UNIVERSITY OF TORONTO
3 1761 00092284 9

BL
1218
S5
1918

UNIVERSITY OF TORONTO
LIBRARY

WILLIAM H. DONNER
COLLECTION

purchased from
a gift by

THE DONNER CANADIAN
FOUNDATION

काश्मीर-संस्कृतग्रन्थावलिः

ग्रन्थाङ्कः १३

षट्त्रिंशत्तत्त्वसंदोहः

THE RESEARCH DEPARTMENT JAMMU & KASHMIR STATE

काश्मीर-श्रीनगर

THE KASHMIR SERIES

OF

TEXTS AND STUDIES.

KASHMIR SERIES OF TEXTS
AND STUDIES.

No. XIII.

THE

SHAṬH TRIMSHAT TATTVA SANDOHA

WITH COMMENTARY

BY

RĀJĀNAKA ĀNANDA.

EDITED WITH NOTES

BY

MAHĀMAHOPĀDHYĀYA PAṆḌIT MUKUNDA RĀMA SHĀSTRĪ,
OFFICER-IN-CHARGE RESEARCH DEPARTMENT,
JAMMU AND KASHMIR STATE,
SRINAGAR.

PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT
OF HIS HIGHNESS LIEUT.-GENERAL MAHĀRĀJA
SIR PRATĀP SINGH SĀHIB BAHĀDUR,
G. C. S. I., G. C. I. E.,
MAHĀRĀJA OF JAMMU AND KASHMIR STATE.

BOMBAY:
PRINTED AT THE "TATVA-VIVECHAKA" PRESS.
1918.

(All rights reserved.)

श्रीमच्छ्रीकण्ठनाथप्रभृतिगुरुवरादिष्टसन्नीतिमार्गो
लब्ध्वा यत्रैव सम्यक्पटिमनि घटनामीश्वराद्वैतवादः ।
कश्मीरेभ्यः प्रसृत्य प्रकटपरिमलो रञ्जयन्सर्वदेश्यान्
देशेऽप्यस्मिन्नदृष्टो घुसृणविसरवत्स्तान्मुदे सज्जनानाम् ॥ १ ॥

तरत तरसा संसाराब्धिं विधत्त परे पदे
पदमविचलं नित्यालोकप्रमोदसुनिर्भरे ।
विमृशत शिवादिष्टाद्वैतावबोधसुधारसं
प्रसभविलसत्सद्युक्त्यान्तःसमुत्प्लवदायिनम् ॥ २ ॥

ॐ

काश्मीर-संस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः १३

षट्त्रिंशत्तत्त्वसंदोहः

श्रीमद्राजानकानन्दविरचितविवरणोपेतः

श्रीभारतधर्ममार्तण्ड-कश्मीरमहाराज-
श्रीप्रतापसिंहवर-प्रतिष्ठापिते
प्रत्नविद्याप्रकाश-(रिसर्च) कार्यालये
तदध्यक्ष-महामहोपाध्याय-पण्डित-मुकुन्दराम-शास्त्रिणा
उद्दिष्टकार्यालयस्थेतरपण्डितसहायेन
संगृह्य, संशोधन-पर्यायाङ्कन-विवरणादिसंस्करणोत्तरं
पाश्चात्यविद्वत्परिषत्संमताधुनिकसुगमशुद्धरीत्युपन्यासादिसंस्कारैः परिष्कृत्य
मुम्बय्यां
तत्त्वविवेचकाख्य-मुद्रणालये मुद्रापयित्वा प्राकाश्यमुपनीतः

THE RESEARCH DEPARTMENT JAMMU & KASHMIR STATE

संवत् १९७५ खैस्ताब्दः १९१८

काश्मीर-श्रीनगर

(अस्य ग्रन्थस्य सर्वे प्रकाशन-मुद्रापणाद्यधिकाराः प्रोक्तमहाराजवर्यैः
स्वायत्तीकृताः सन्ति)

LIBRARY
SEP 1 1970
UNIVERSITY OF TORONTO

BL
1218
S5
1918

Printed by
Bhiwaji Hari Shinde at the "Tatva-Vivechaka" Press,
Nos. 1, 2, 3, Khetwadi Back Road, Bombay;
and Published by
the Research Department, Srinagar, Kashmir.

ओं नमोऽद्वैतसंविद्वपुषे क्षित्यादितत्त्वात्मने शंकराय ।

अथ

षट्त्रिंशत्तत्त्वसंदोहः

श्रीमद्राजानकानन्दविरचितविवरणोपेतः

यदयमनुत्तरमूर्ति-
निजेच्छयाखिलमिदं जगत्स्रष्टुम् ।
पस्पन्दे स स्पन्दः
प्रथमः शिवतत्त्वमुच्यते तज्ज्ञैः ॥१॥

इह हि स्वतन्त्रशिवाद्वयदर्शने परमेश्वरः स्वतन्त्रश्चिद्घनसंवित्स्वभावः स्वया स्वातन्त्र्याख्यया शक्त्या सततं शिवादिधरण्यन्ततत्तद्भुवनभूततत्त्वात्मना क्रीडनादिशीलत्वात् कृत्यपञ्चकविधायी, वस्तुतः क्रमराहित्येऽपि विश्वसृष्टौ आभासनमात्रसारेण पारमार्थिककार्यकारणभावेन क्रममपि उद्भावयन्, अनाख्यत्वेऽपि स्वेच्छयैव स्वात्मभित्तौ तत्तच्छिवादितत्त्वाभिख्याम् अवभासयति । तथात्वेऽपि षट्त्रिंशत्तत्त्व-

मयकुलस्वरूपपरामर्शनात् आखण्ड्येन विश्वभरितां स्वचमत्कारविमर्शसाराम् अनुत्तरानन्दघनावस्थां नोज्झति, इति वास्तवाशयाववबोधनाय कश्चिन्महामाहेश्वरः परमेशशक्तिपातानुगृहीतः तत्त्वक्रमप्रक्रियाम् आर्याभिरेकविंशत्या समुपनिबबन्ध, – यदयमित्यादिना ।

अनुत्तरमूर्तेर्भगवतः परमेश्वरस्य प्रकाशघनस्वात्मैकात्म्येन अवस्थितं विश्वं सिसृक्षोः दर्पणनगरवत् स्वेच्छयैव स्वात्मनि आद्या प्रोन्मिमीलयिषावस्था शिवतत्त्वव्यपदेश्या पञ्चशक्तिनिर्भरत्वात् स्वातन्त्र्यात् चिदादिप्राधान्येन क्रमशः शुद्धाध्वनि तत्त्वसृष्ट्यवभासनम्, मायाविद्यादेः संवित्प्रकाशघनपरमशिवात् व्यतिरेकानतिरेकविकल्पैरुपहतत्वात् स्वातन्त्र्यमेव केवलं विश्वोत्पत्तिसंहरणादौ मूर्धाभिषिक्तं – तत्तदनन्तशक्तिनिचयानां क्रोडीकारित्वात्, वक्ष्यमाणेऽपि तत्तद्रूपोपग्रहणे स्वातन्त्र्याप्रमुक्तत्वान्न प्राच्यस्वभावापायः ॥ १ ॥

इच्छा सैव स्वच्छा
संततसमवायिनी सती शक्तिः ।
सचराचरस्य जगतो
बीजं निखिलस्य निजनिलीनस्य ॥२॥

तस्य स्वाभिन्ना स्वतन्त्रेच्छाशक्तिरेव उद्भविष्यतो विश्वस्य स्वान्तर्निलीनत्वात् बीजभूता शक्तितत्त्वतां याति, शक्तेः शक्तिमद्धर्मत्वेऽपि न अन्यदर्शनाभिमतवत् तस्मात् व्यतिरेकः, नैष्कर्म्येण अत्र इच्छायाः स्वच्छत्वात् हृदय-विमर्श-सारोर्मि-प्रभृतिभिः संज्ञाभिः तत्तद्दर्शनेषु अभिधानम् । परमेश्वर एव हि स्वैश्वर्योच्छलत्तया पूर्णाहन्ताचमत्कारतारतम्येन शक्तिदशामधिशेते, इत्यत्र आनन्दशक्तिप्राधान्यम् ॥ २ ॥

स्वेच्छाशक्त्युद्गीर्णं
जगदात्मतया समाच्छाद्य ।
निवसन्स एव निखिला-
नुग्रहनिरतः सदाशिवोऽभिहितः ॥३॥

तस्यैव परमेश्वरस्य स्वस्वातन्त्र्योद्भासितस्य विश्वस्य विशुद्धसंविन्मात्राधिकरण्येन स्वात्मन्येव समुल्लासनात् सदित्याख्यानात् सदाशिवतत्त्वावस्था, तत्र प्रोन्मीलितमात्रचित्रकल्पतया इदमंशस्य अस्फुटत्वात् इच्छाप्राधान्यम्, अतः स भाविनः समस्तभावराशेः सम्यक् बहिरवबिभासयिषालक्षणक्रीडारसिकत्वात् अनुग्रहनिरतस्तद्भूमिकां गृह्णाति इत्यतो निवसन्नित्युक्तम् ॥ ३ ॥

विश्वं पश्चात्पश्यन्-
इदन्तया निखिलमीश्वरो जातः ।
सा भवति शुद्धविद्या
येदन्ताहन्तयोरभेदमतिः ॥ ४ ॥

एवं क्रमावभासनात् विश्वस्य शुद्धसंविन्मात्राधिकरण एव स्फुटतया परामृश्यमानस्य अहमंशेऽभिषेचनात् स एव परमेश्वरः ईश्वरतत्त्वदशामधिश्रयति, अत्र वेद्यजातस्य स्फुटावभासनात् ज्ञानशक्त्युद्रेकः । आन्तरदशाया उद्रिक्तत्वात् सदाशिवावस्था, बहिर्भावपरतोद्रेकात् तु ईश्वरावस्था इत्यनयोर्विशेषः । प्ररूढभेदस्य इदन्तांशस्य समधृततुलापुटन्यायेन अहमंशस्फुरणायां शुद्धविद्यातत्त्वम् । अत्र विश्वस्य स्फुटतरं परामर्शनात् क्रियाशक्तिः प्रधाना । इयति च शुद्धस्वातन्त्र्यमेव तत्तद्वैचित्र्येण प्रस्फुरति, इति शुद्धोऽध्वा ॥ ४ ॥

माया विभेदबुद्धि-
र्निजांशजातेषु निखिलजीवेषु ।
नित्यं तस्य निरङ्कुश-
विभवं वेलेव वारिधे रुन्धे ॥ ५ ॥

अशुद्धे पुनरध्वनि परमेश्वर एव स्वात्मप्रच्छादनक्रीडया अघोरभट्टारकभूमिं मन्त्रमहेश्वररूपां गृहीत्वा दुर्घटसंपादनसामर्थ्येन मायाशक्त्या स्वतोऽन्योन्यतश्च भिन्नम् अणूनां भोगसिद्धये कलादिक्षित्यन्तं जडाजडवर्गं क्रमतोऽक्रमतोऽपि अवभासयति, तत्र भिन्नभिन्नप्रथात्मकमायीयमलेन स्वाङ्गकल्पेष्वपि जडवेद्यवर्गेषु विभिन्नतया बुद्धिरेव मायाख्यं तत्त्वं, येन तस्य निरर्गलं स्वातन्त्र्यं प्रतिहन्यते, वेलयेव अब्धितरङ्गाणां वैभवम् ॥ ५ ॥

स तया परिमितमूर्तिः
संकुचितसमस्तशक्तिरेष पुमान् ।
रविरिव संध्यारक्तः
संहृतशक्तिः स्वभासनेऽप्यपटुः ॥६॥

अविकार्यस्यापि तस्य चिदात्मनः स्वशक्तीनां संकोचनपुरःसरं शक्तिदारिद्र्यमापन्नस्य अण्वपरपर्याया पुरुषसंज्ञा, संहृतशक्तित्वेन परिमितात्मा स स्वात्मैश्वर्यमपि प्रत्यभिज्ञातुमपटुः संचरति विचित्रयोनिषु । यदा पुनः शक्तिपाततारतम्यात् विद्याभिज्ञापितैश्वर्यः स्वाङ्गकल्पमेव विश्वं प्रत्यभिजानीयात् तदा जीवच्छिवभावं प्रत्यापद्यते ॥ ६ ॥

संपूर्णकर्तृताद्या
बह्व्यः सन्त्यस्य शक्तयस्तस्य ।
संकोचात्संकुचिताः
कलादिरूपेण रूढयन्त्येवम् ॥ ७ ॥

शक्त्यन्तरक्रोडीकारिण्या स्वातन्त्र्यशक्त्यावियुक्तत्वादेव परमेश्वरस्य बहुशक्तित्वं, संकोचग्रहणादेव सर्वास्तच्छक्तयः संकुचितीभूय कलादितत्त्वपञ्चकेन प्ररोहमुपगच्छन्ति । ता यथा—सर्वकर्तृता सर्वज्ञता तृप्तिः नित्यता स्वातन्त्र्यमिति, एतत्पञ्चकं शुद्धाशुद्धभेदेन द्विधा,—परमेशविषयतया शुद्धं, संसारविषयतया तु अशुद्धम् ॥ ७ ॥

तत्सर्वकर्तृता सा
संकुचिता कतिपयार्थमात्रपरा ।
किंचित्कर्तारममुं
कलयन्ती कीर्त्यते कला नाम ॥८॥

गोपितस्वरूपत्वान्निरुद्धशक्तेः परमेश्वरस्य सर्वकर्तृताशक्तिः प्राणादिपरिमितप्रमातृभावे किंचित्कर्तृतोद्दलनात्मना

कलनेन अधःप्रक्षेपात् कलातत्त्वात्मतां याति, यद्वशात् किंचिदेव कर्तुमुत्सहतेऽणुः न सर्वत्र कर्तृत्वमिति ॥ ८ ॥

सर्वज्ञतास्य शक्तिः
परिमिततनुरल्पवेद्यमात्रपरा ।
ज्ञानमुत्पादयन्ती
विद्येति निगद्यते बुधैराद्यैः ॥ ९ ॥

एवं तस्यैव सर्वज्ञताशक्तिः संकोचं गृहीतवती किंचिज्ज्ञेयमात्रपरत्वेन ज्ञानोत्पादनात् विद्यातत्त्वं, विद्ययैव बुद्धिदर्पणे प्रतिफलिता भावा विविच्यन्ते — गुणसंकीर्णतया तस्या विवेक्तुमक्षमत्वात्, तस्मात् विद्ययैव अर्थविवेकः ॥ ९ ॥

नित्यपरिपूर्णतृप्तिः
शक्तिस्तस्यैव परिमिता तु सती ।
भोगेषु रञ्जयन्ती
सततममुं रागतत्त्वतां याता ॥ १० ॥

परमेश्वरस्य नित्यपरिपूर्णतृप्तिर्नाम शक्तिः पारिमित्यं याता यत्र क्वचन उपादेयाद्यभिमते ‘किंचिन्मे भूयात्’ इति

सामान्येनाभिष्वङ्गमात्रादापद्यते रागतत्त्वम् । विशेषाभिष्वङ्गस्तु अस्यैव पल्लवितप्राय इति एतदेव कलाविद्ययोः प्रागुक्तयोः किंचिद्रागे निमित्तम् ॥ १० ॥

सा नित्यतास्य शक्ति-
र्निकृष्य निधनोदयप्रदानेन ।
नियतपरिच्छेदकरी
कॢप्ता स्यात्कालतत्त्वरूपेण ॥ ११ ॥

अकालकलितस्य चिदात्मनो नित्यत्वाख्या शक्तिः न्यग्भावमाश्रित्य कार्यारूषितकर्तृत्वकलनया अणुं तुट्यादिक्रमाभासनात्मना कालेन संयोज्य कालतत्त्वव्यपदेश्या कल्प्यते, येन अयमणुः भूतादिक्रियाक्रमकलितः कालवशतामापद्यते ॥ ११ ॥

यास्य स्वतन्त्रताख्या
शक्तिः संकोचशालिनी सैव ।
कृत्याकृत्येष्ववशं
नियतमसुं नियमयन्त्यभून्नियतिः ॥१२॥

स्वातन्त्र्यमेव अस्य परप्रमातुः संकुचत् नियतितत्त्वतामाभासयति, यतः कार्याकार्येषु नियमाधानात् विशिष्टे कार्ये विशिष्टं कारणमेव आदध्यान्नानियतमिति । एतेन कलादिना कञ्चुकेन आवृतोऽयं शक्तिदारिद्र्यमनुभूय कलादिमुखेनैव स्ववैभवात् प्रतिवितीर्णकिंचिदंशः पशुरित्युच्यते ॥ १२ ॥

इच्छादित्रिसमष्टिः
शक्तिः शान्तास्य संकुचद्रूपा ।
संकलितेच्छाद्यात्मक-
सत्त्वादिकसाम्यरूपिणी तु सती ॥१३॥

बुद्ध्यादिसामरस्य-
स्वरूपचित्तात्मिका मता प्रकृतिः ।
इच्छास्य रजोरूपा-
हंकृतिरासीदहंप्रतीतिकरी ॥ १४ ॥

अस्य शान्ताख्या शक्तिरक्षुब्धत्वात् इच्छादीनां शक्तीनां गर्भीकरणात् समष्टिरूपा, पारिमित्यग्रहणाच्च गुणानामविभागावस्था प्रकृतितत्त्वम् । गुणानामिच्छादिशक्तित्रिकेन अ-

न्वारब्धत्वात् त्रित्वं – यत्प्रक्षोभात् प्राकृतिकसर्गस्य प्रसरः । तत्र चित्तात्मके बुद्ध्यहंकृन्मनांसि साम्यावस्थामधिश्रयन्ति । अत्र तत्त्वक्रमप्रसरे शिवादिसकलान्तेषु प्रमातृवर्गेषु ज्ञानक्रियाशक्ती एव मुख्यमुपकरणं, ते एव संकुचद्रूपे ईश्वर-शुद्धविद्ये, संकुचिते विद्याकले, अत्यन्तं संकुचिते बुद्धिकर्मेन्द्रियाणि, क्रियायाः संकोचसीम्नि भूतसूक्ष्मादि इति विज्ञेयम् । अणोः रजःपरिणामिणी इच्छाशक्तिः अहमित्यभिमानलक्षणा अहंकृतिः ॥ १३–१४ ॥

ज्ञानापि सत्त्वरूपा
  निर्णयबोधस्य कारणं बुद्धिः ।
तस्य क्रिया तमोमय-
  मूर्तिर्मन उच्यते विकल्पकरी ॥१५॥

सत्त्वपरिणामिनी ज्ञानशक्तिरेव अर्थाध्यवसायलक्षणा बुद्धिः । तमःपरिणामिनी क्रियाशक्तिः । विकल्पकरणलक्षणं मनस्तत्त्वमुच्यते ॥ १५ ॥

वामादिपञ्चभेदः
  स एव संकुचितविग्रहो देवः ।

ज्ञानक्रियोपराग-
प्राधान्याद्द्विविधविषयरूपोऽभूत् ॥१६॥

स एव क्रीडादिसतत्त्वो वामदेवादिपञ्चमूर्तित्वात् संकुचितो भूत्वा ज्ञानशक्त्युपरञ्जनप्रधानतया ज्ञानेन्द्रियतद्विषयशरीरतां, क्रियाशक्त्युपाधिप्राधान्यात् कर्मेन्द्रियव्यापारवत्त्वं च उपादत्ते । शक्तिपञ्चकोपादानात् करणानां पञ्चधात्वं बोध्यम् ॥ १६ ॥

श्रोत्रं चक्षुः स्पर्शन-
जिह्वा-घ्राणानि बोधकरणानि ।
शब्द-स्पर्शौ रूपं
रस-गन्धौ चेति भूतसूक्ष्माणि ॥ १७ ॥

श्रोत्रादीनि ज्ञानेन्द्रियाणि, शब्दादीनि तन्मात्राणि ॥१७

अयमेवातिनिकृष्टो
जातो भूतात्मनापि भूतेशः ।

गगनमनिलश्च तेजः
सलिलं भूमिश्च पञ्चभूतानि ॥१८॥

अत्यन्तसंकोचग्रहणात् अचिद्रूपतामवभास्य आकाशादीनि पञ्चभूतानि ॥ १८ ॥

श्रोत्रादिकरणवेद्याः
शब्दाद्यास्तानि वेदकान्येषाम् ।
वचनकरी वागासीत्
पाणिः स्यात्करणभूत आदाने ॥ १९ ॥

शब्दादिज्ञानसाधनानि श्रोत्रादिकरणानि, वचनादिक्रियासाधनानि वागादीनि कर्मेन्द्रियाणि ॥ १९ ॥

गमन-विसर्गानन्द-
त्रितये पादादिकं करणम् ।
गन्धवती भूमिः स्या-
दापः सांसिद्धिकद्रवास्तेजः ॥ २० ॥

उष्णस्पर्शमरूप-
स्पर्शो वायुरम्बरं सशब्दम् ।
षट्त्रिंशत्तत्त्वमयं
वन्दे कौलं कुलातिगं शंभुम् ॥२१॥

आदिना पायूपस्थौ गृह्येते । गन्धवत्त्वं भूमेर्लक्षणम्, सांसिद्धिकद्रवत्वमब्लक्षणम्, उष्णस्पर्शेन तेजो लक्ष्यते, अरूपस्पर्शो वायुलक्षणम्, शब्द आकाशस्य इति प्रत्येकं मुख्यगुणनिर्देशः । तत्त्वानामुत्तरोत्तरं व्याप्य-व्यापकभावेन भूमिर्व्याप्या जलादिशिवान्तं व्यापकानि पञ्चत्रिंशत्, एवं भूतसृष्टौ भूमौ व्योमादिगुणा व्यापकत्वेन अनुगताः सन्ति । परमशिवतत्त्वस्य सर्वत्र अनुगतत्वात् विश्वमयतदुत्तीर्णयामलकौलस्वरूपमेव भक्तानां समावेशार्हम्, इति वन्दनोपसंहारोक्त्या उपक्षिप्तम् इति शिवम् ॥

इति षट्त्रिंशत्तत्त्वसंदोहः श्रीमद्राजानकानन्दाचार्य-
विरचितविवरणोपेतः समाप्तः ॥

सद्विद्यानां संश्रये ग्रन्थविद्वद्-
व्यूहे ह्रासं कालवृत्त्योपयाते ।
तत्तत्सद्धर्मोद्दिधीर्षैकतान-
सत्प्रेक्षौजःशालिना कर्मवृत्त्यै ॥ १ ॥

श्रीमत्कश्मीराधिराजेन मुख्यै-
र्धर्मोद्युक्तैर्मन्त्रिभिः स्वैर्विवेच्य ।
प्रत्यष्ठापि ज्ञानविज्ञानगर्भ-
ग्रन्थोद्धृत्यै मुख्यकार्यालयो यः ॥ २ ॥

तत्राजीवं निर्विशद्भिर्मुकुन्द-
रामाध्यक्षत्वाश्रितैः सद्भिरेषः ।
पूर्त्या शुद्ध्या व्याख्यया संस्कृतः स्तात्
पूर्णो ग्रन्थः श्रेयसे सज्जनानाम् ॥ ३ ॥

तिलकम् ॥

श्रीशिवार्पणं भूयात् ॥

THE KASHMIR SERIES

OF

TEXTS AND STUDIES.

KASHMIR SERIES OF TEXTS AND STUDIES.
No. XIV.

THE

BHĀVOPAHĀRA

OF

CHAKRAPĀṆI NĀTHA
WITH COMMENTARY
BY
RAMYA DEVA BHAṬṬA.
EDITED WITH NOTES
BY
MAHĀMAHOPĀDHYĀYA PAṆḌIT MUKUNDA RĀMA SHÂSTRÎ,
OFFICER-IN-CHARGE RESEARCH DEPARTMENT,
JAMMU AND KASHMIR STATE,
SRINAGAR.

PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT
OF HIS HIGHNESS LIEUT.-GENERAL MAHĀRĀJA
SIR PRATĀP SINGH SĀHIB BAHĀDUR,
G. C. S. I., G. C. I. E.,
MAHĀRĀJA OF JAMMU AND KASHMIR STATE.

BOMBAY:
PRINTED AT THE "TATVA-VIVECHAKA" PRESS.
1918.

(All rights reserved.)

श्रीमच्छ्रीकण्ठनाथप्रभृतिगुरुवरादिष्टसन्नीतिमार्गो
लब्ध्वा यत्रैव सम्यक्पटिमनि घटनामीश्वराद्वैतवादः ।
कश्मीरेभ्यः प्रसृत्य प्रकटपरिमलो रञ्जयन्सर्वदेश्यान्
देशेऽप्यस्मिन्नदृष्टो घुसृणविसरवत्स्तान्मुदे सज्जनानाम् ॥ १ ॥

तरत तरसा संसाराब्धिं विधत्त परे पदे
पदमविचलं नित्यालोकप्रमोदसुनिर्भरे ।
विमृशत शिवादिष्टाद्वैतावबोधसुधारसं
प्रसभविलसत्सद्युक्त्यान्तःसमुत्प्लवदायिनम् ॥ २ ॥

ॐ

काश्मीर-संस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः १४

भावोपहारः

श्रीमच्चक्रपाणिनाथविरचितः

श्रीमदाचार्य-भट्टरम्यदेवविरचितविवरणोपेतः

श्रीभारतधर्ममार्तण्ड-कश्मीरमहाराज-

श्रीप्रतापसिंहवर-प्रतिष्ठापिते

प्रत्नविद्याप्रकाश-(रिसर्च) कार्यालये

तदध्यक्ष-महामहोपाध्याय-पण्डित-मुकुन्दराम-शास्त्रिणा

उद्दिष्टकार्यालयस्थेतरपण्डितसहायेन

संगृह्य, संशोधन-पर्यायाङ्कन-विवरणादिसंस्करणोत्तरं

पाश्चात्यविद्वत्परिषत्संमताधुनिकसुगमशुद्धरीत्युपन्यासादिसंस्कारैः परिष्कृत्य

मुम्बय्यां

तत्त्वविवेचकाख्य-मुद्रणालये मुद्रापयित्वा प्राकाश्यमुपनीतः

THE RESEARCH DEPARTMENT JAMMU & KASHMIR STATE

संवत् १९७५ खैस्ताब्दः १९१८

काश्मीर-श्रीनगर

अस्य ग्रन्थस्य सर्वे प्रकाशन-मुद्रापणाद्यधिकाराः प्रोक्तमहाराजवर्यैः

स्वायत्तीकृताः सन्ति)

BL
1218
S5
1918

Printed by
Bhiwaji Hari Shinde at the "Tatva-Vivechaka" Press,
Nos. 1, 2, 3, Khetwadi Back Road, Bombay;
and Published by
the Research Department, Srinagar, Kashmir.

ओं नमोऽनन्तशक्तये शिवाय ।

अथ

भावोपहारः

श्रीमच्चक्रपाणिनाथविरचितः

श्रीभट्टज्योग्देवात्मजभट्टरम्यदेवाचार्यविरचितविवरणोपेतः ।

स्वविमर्शविकचकानन-
  समुन्मिषद्विषयकुसुमसंतत्या ।
करणेश्वरीभिरभितः
  समर्चितो बोधभैरवो जयति ॥ १ ॥

विमर्शमय्या निजशक्तिदेव्या
  विश्वप्रथाभैरवक्लृप्तपूजः ।
जयत्यकामोदितरश्मिरूप-
  स्वशक्तिपुञ्जात्मजचक्रनाथः ॥ २ ॥

क्रमाक्रमक्रियाक्रान्ति-
  व्यतिक्रमनिकृन्तनम् ।
देवं चक्रं श्रये क्रीडा-
  क्रोडीकृतकृतान्तकम् ॥ ३ ॥

पं० ८ ख० पु० पुञ्जाकरेति पाठः ।

इह हि निरुत्तरनिर्निकेतनावटविटङ्कसंकलित-सकलकलनाकुलं परमभैरवचक्रेश्वरसतत्त्वमवाच्य-वाचकमवर्णनिर्वर्णनमनाद्यनन्तमन्तर्बहीरूपमपू-ज्यपूजकमपि प्रसरदाद्योद्यन्तृतावतारक्रमावता-रितपञ्चवाहप्रपञ्चमयाकृत्रिमपूज्यपूजकक्रमेण प्रो-त्स्फुरति इति रीतिरविगीतसुखसंप्रदायसरणि-समनुगतसर्वागमान्तरघुमघुमायमानश्रीविज्ञान-भैरवादिषु स्वकण्ठेनैव भगवता निर्णीता, श्रीस्व-तन्त्रभट्टारकादिषु च 'अकृत्वा मानसं यागम्' इत्या-दिवाक्यैर्ध्वनिता मानसयागातिरेकिणी सर्वभा-वोपहृतिः, तामेव भट्टारकपादाः स्तोत्रमुखेन प्रकटयन्त आदिश्लोकेन आसूत्रयन्ति

ओं नमः सूर्यकलाजाल-
कालदेहापहारिणे ।

पं० १ ख० पु० निर्निकेतसंकेतावटेति पाठः ।

पं० २ ख० पु० कुलपरभैरवेश्वरेति पाठः ।

पं० ६ ख० पु० रवगीति इति पाठः ।

आधाराधेयपीठाय
भवायाभवदायिने ॥ १ ॥

भवाय हेलामात्रोद्भावितभवाभवाय नमः । नम इति नमः-शब्दगतवर्णद्वयवित्यासेन चतुर्थ्यन्तपदावेदिततत्स्वरूपसर्वावेदननयेन उन्मनीभावः तत्समाविष्टेन सूचितः, तेन तत्र मनो विलापयामि इत्यर्थः । कालदेहं वा कालविकल्पनोल्लासिकामीहां वा सूर्यकलाजालेन द्वादशात्मकमरीचिचयेन योऽपहरतीति तच्छीलोऽयमक्रमपदेन दर्शितः, सूरीनामकलाजालेन मध्यमधामानुवेधेन भावाभावभूम्युल्लङ्घनात्मना कालदेहापहारी महाहङ्कारात्मकमहाकालदेहमपहर्तुं शीलं यस्य स तथोक्तः । तदुक्तं

'कालीं महाकालमलंग्रसन्तीम्'

इत्यादि । ततश्च सूर्यकलाजालेन वा सूर्यकलाजालमेव वा कालदेहमपहरति इति अलंग्रासम-

---

पं० १२ ख० पु० देहाहंकारेति पाठः ।

हौघः प्रकटितः, न ह्यक्रमानाख्यपरचिच्चक्रेश्वरीसमुदये कालो नाम कश्चित् उपपद्यते। तदुक्तं मयैवाक्रमकल्लोलकारिकासु

‘कालः कालेन काल्यश्चेत्कालः काल्येत केन वा।
अकाल्य एव कालश्चेत्काल्य एव तथा न किम्॥
मृत्युः स्फुरत्प्रकाशान्तर्निगीर्णो निगिरेत्कथम्।
अस्फुरन्नप्रकाशत्वान्नान्तर्ग्राह्योऽथ वा न किम्॥’

इति। तथा आधाराधेयौ षडध्वतदुत्तीर्णरूपौ भवाभवौ तत्स्थस्यैवास्य, उद्योगावभासचर्वणविलापनतदुत्तरकृत्ययोगात् पीठ इव पीठो यस्य ‘आधारध्येयपीठाय’ इति तु पाठे आधारे ध्येया शक्तिरेव तदधिष्ठानेन साधिष्ठानत्वात् पीठो यस्य तस्मै भवाय, अभवदायिने अशिवपरिखण्डनाय मोक्षप्रदाय वा नमः इत्यनेन कालदेहापहारिणा आधाराधेयपीठत्वप्रतिपादनेन सर्वात्मसात्करणलक्षणः सततोदितोऽकृत्रिमपूजानय उट्टङ्कितः। अत्र अपहारिपदेन संहार उक्तः, पीठपदेन स्थितिक्रमो, भवपदेन सृष्टिः, इत्यक्रमौघः सृष्टिपर्यव-

सानेन अनेन श्लोकेन चर्चितः । चतुर्थस्य सकलक्रमाक्रमभित्तिभूतत्वात् पृथक् अनभिधानमेव ॥ १ ॥

अथ स्थितिप्रधानसृष्टिसंहारपरिघट्टनेन द्वितीयं पूजाक्रमं दर्शयति

नमः शिशुनिशाकान्त-
कलाकमलमालिने ।
परमानन्ददेहाय
शिवायाव्यक्तमूर्तये ॥ २ ॥

अव्यक्ता भवाभवस्थितिप्राधान्यात् उट्टङ्कत्वेन अप्रकटिता मूर्तिर्यस्य तस्मै शिवाय महत्यावेशेऽपि अपरिभ्रंशशीलाय । नम इति व्याख्यातम् । शिशुतया आद्या भेदस्वभावेन स्थिता येयं निशाकान्तस्य कालरात्रीरमणस्य परभैरवस्य कलनात् कला सैव अघोरघोराघोरातिघोरावर-

पं० १० ख० पु० अटङ्कत्वेनेति पाठः ।

पं० १३ क० पु० आद्योद्भवस्वभावेनेति पाठः ।

णत्रयोपेतवर्गाष्टकदललालिता, सैव कमलं तन्मालिने तदाधाराय तदाधेयाय वा । निशाकान्तकला संहारदेवी, तथा चास्मत्पुत्रः

'शिव शिवासनमूर्ध्नि सदा स्थिता
विगतकालकलाकलनाक्रमा ।
कृशतया कृशिमव्यपलापिनी
जयति कापि कला विगतक्रमा ॥'

इति । वाजसनेयभट्टारिकायामपि

'अवधूता निराचारा सर्वभूतान्तरे स्थिता ।
क्रीडत्यात्ममयैर्भावैर्बालः क्रीडनकैरिव ॥
प्रबुद्धपूर्णभावाभ्यां विभज्यात्मानमात्मना ।
अप्रबुद्धप्रबुद्धेन क्रीडार्थं भावयेद्भृशम् ॥'

इति । मालिने धारिणे इति स्थितिः । आनन्ददेहाय इति सृष्टिः तस्या आनन्दरूपत्वात्, अव्यक्तमूर्तये इति संहारः । अयमपि सततसिद्ध एव पूजाक्रमः ॥ २ ॥

पं० १ ख० पु० लालितमिति पाठः ।
पं० ९ ख० पु० भावान्तरस्थिता इति ।
पं० १२ ख० पु० भावयेत्स्वयमिति पाठः ।

अथ गुणीभूतसृष्टिस्थितिरूपतृतीयचक्राक्रमपूजां प्रतिजानीते

नमः पाशौघसंघट्ट-
लयविश्लेषकारिणे ।
मन्त्रगर्भोदरस्थाय
हराय परमात्मने ॥ ३ ॥

पाशानाम्—आणवमायीयकार्मिकाणां मलानामोघः तस्य संघट्टः अहेतुकेन केनापि क्रमेण उल्लासः, तेन वा तत्र वा तस्य वा योऽयं लयः, तथा विश्लेषः पृथग्भावस्तत्करणशीलत्वेन वर्तमानाय सदा त्रितयकारित्वान्नान्तरीयकं तिरोधानानुग्रहकारित्वं ध्वनितम् । मन्त्रगर्भोदरस्थाय इत्यत्र त्रिधा गुर्वाम्नायः—मन्त्रा वर्णरूपा गर्भे यस्याः सा मालिनी मन्त्रगर्भा तदन्तर्गता तस्या उदरे वाच्यत्वेन अभ्यन्तरे तिष्ठति इति स तथा, अथ वा मन्त्राणां गर्भो मन्त्रगर्भः तदन्तर्गतः प्रथमस्वरः

तस्य उदरम् उत्तरपक्षप्रतिक्षेपेण मध्यमकला तुर्य्य-र्धरूपा तत्र स्थिता, अथ वा मननत्राणधर्मित्वात् मरीचिषु स्थित्युदितासु मन्त्र इत्यादिरूपतया योऽयम् अनाशावशावो रावसंघट्टकतया

‘ त्वामजामकृतपञ्चकारण-
द्रावणोद्भमरधामभैरवीम् ।
स्तौम्यनाहतहतव्यतिक्रम-
स्फाररावकृतवीरघट्टनाम् ॥ ’

इत्याद्यस्मद्विरचिताकुलकौलिकात्रिंशिकोक्तस्व-रूपः तस्य गर्भे गहनम् अवटरूपं तदुदरे तद्गमनि-कागम्ये धाम्नि तिष्ठति इति स तथोक्तः, सर्वत्र चात्र आद्यभट्टारकोपदेश एव विराजते तस्यैव परमात्मत्वात्, अत एवात्र भव-शिव-हर-शब्दैः श्लोकत्रयोदितसृष्ट्याद्युपदेशचरमस्य अनाख्यस्य सर्वान्तश्चारित्वमवाग्गोचरत्वात् सूचितमेव । अत्र ओघसंघट्टशब्दाभ्यां सृष्टिस्थित्योः, हरशब्देन संहारस्य द्योतनेऽकृतका कापि पूजा निरूपितैव ॥ ३ ॥

पं० १ ख० पु० तुटिरूपेति पाठः ।

तदेवमनवच्छिन्नसततसिद्धनिरुपादानानन्ता-नव धिकस्वरूपभूतपूजासंभवे शम्भोर्निर्गुणस्य अनन्तगुणस्य वोपचारैरान्तरैर्बाह्यैर्वा कायिकै-र्वाचिकैर्मानसैर्वा पूजयितुमशक्यत्वात् कोऽयं भावोपहारो नाम इत्याशङ्क्याह

यद्यपि त्वं गुणातीतो
वाक्पतेरप्यगोचरः ।
तथाप्या हृदयात्स्तोतु-
मुद्यता वाक्सदा मम ॥ ४ ॥

अतिभक्तिरसावेश-
विवशा विश्वतो मुख ।
त्वत्प्रेरिता यतो नाथ
नापराधोऽस्ति मे क्वचित् ॥५॥

यद्यपि-तथापि-शब्दाभ्यामनुपपत्तावपि उप-पत्तिं प्रकाशयद्भ्यामनुपपत्तिरेव सर्वोपपत्तिरिति

कापि युक्तिरुक्ता, तथाहि गुणातीतोऽपि तस्यैव विषयोऽपि तदुल्लासितेन केनापि दुर्घटघटनानयेनार्वाचीनभूमिमूर्तित्वेन विषयधाम अश्नुते। तदुक्तं तपस्विप्रबोधनाथेन

'परतरतयापि रूपं
　यद्यत्कलयामि तत्तदधरं ते।
अधरतरापि न कलना
　सा काचिद्यत्र न स्थितास्यभितः॥'

इति। आ हृदयात् आ परधाम्नः पश्यन्त्यादिरूपेण सदोदितापि वैखर्यात्मना त्वयैव एतेन आद्यभट्टारकेण प्रकर्षेण ईरिता सती प्रसरति, इति मम न कश्चित् अपराध इत्यहं तत्समावेशित एवोदितः, यदि अहं नाम कश्चित् अन्यो भवेयं, भवेत् नाम अपराधो, यदि परमपराधोऽपि अहमपि भवानपि एकमेव तत्त्वं, ततश्च कोऽपराधशब्दार्थः। तदुक्तं मयैव शिवरवस्तोत्रे

'अथ वा हृदम्बरगतेन
　जनिनिधनहीनमूर्तिना।

पं० ३ ख० पु० भूमिवर्तित्वेनेति पाठः।

चन्द्रविमलमुकुटेन नुता-
वनुमोदिता मम मतिः प्रवर्तते ॥'

इति । अतिक्रान्ता भक्तिरसाविभागभूमिर्येन तादृक् योऽयमावेशः सर्वतो-दिक्कतन्मयतोदयः तेन विवशा विशिष्टा वशेव करेणुरिव निजबोधरसचर्वणसदावरणनिरावरणमदविघूर्णितत्वात् विश्वतः सर्वतो मुखानि यस्य स तथा, इत्यनेन एतदुक्तं भवति – न तत् वाच्यं कृत्यं वा किञ्चन यत् त्वत्परिचर्वणचारुरूपतया न चकास्ति । ततश्च सुप्तप्रलापगालिदानादिभिरपि त्वमेव स्तूयसे इत्याह 'विश्वतो मुख' इति विश्वत आ मुखम् यस्य इति वा । पशुकुक्कुटादिमूर्तिपर्यन्तमस्य आविर्भूतत्वमबाध्यमित्यर्थः । सर्वथापि अनुदितानस्तमितापरिमितचिदेकघनमिति प्रतिपादितम् ॥ ४ ॥ ५ ॥

त्वत्पादाब्जरजःपूत-
चिताभूतिविभूषितात् ।

पं० २ क० पु० ननु मतिः इति पाठः ।

गृहाण मत्तः श्रीकण्ठ?
भावपूजामकृत्रिमाम् ॥ ६ ॥

श्रीर्विश्ववैचित्र्यशोभोद्भाविनी शक्तिः कण्ठे अविभागधाम्नि यस्य तस्यामन्त्रणम्, गृहाण इति संप्रदानसंप्रदेयतया त्वमेव स्फुरसि इति याञ्चार्था अकृत्रिमशब्देन सूचिता । तव पादाः पिण्डस्थादिभेदेन चतस्रोऽवस्थाः ता एव अब्जं तत्र तदुल्लासितज्ञेयकार्यवस्तु विकल्परूपं, रञ्जनात् रजः तेन पूता ततो वा पूता सद्युक्तिपरिपवनेन क्षपिता या चिताभूतिः सर्वसंक्षयपरचिद्रूपा सर्वोद्भूतिरूपा वा तया विशिष्टायां भुवि उषितात् प्रस्तोष्यमाणात् मत्तो मम सकाशात् त्वमपि मत्तो निजानन्दनिर्भरो भावपूजाम् आत्मसात्करोषीति ॥ ६ ॥

तामेव स्नानक्रमेण प्रस्तौति

हृत्पुष्कराख्ये स्नात्वान्त-
स्तीर्थे योगिनिषेविते ।

संबोधधौतवसनः
श्यामकण्ठं यजाम्यहम् ॥७॥

हृत्पुष्करं हृत्पद्मं तत्र बद्धलक्ष्यतया स्नात्वा सकलमलविधूननं विधाय, अथ वा हरतीति हृत् संहारसंहारिणीरूपम्, एतदेव हृत्पुष्करं तीर्थं सर्वचक्राणां तत्रैव परमविश्रान्तिलाभात्, तत्र सर्वविशुद्धिमादाय योगिनोऽत्र पररश्मिरूपाः, सम्यक् बोधः संबोधः तदेव धौतं सकलकालिकाविशुद्धं वसनम् अशेषाच्छादकतया वर्तमानं यस्य, इति सर्वोत्तीर्णसर्वमयतोक्तिः, श्यामकण्ठः सर्वघट्टकमहातमिस्रारूपसंकलनधामात्मिका श्यामा कण्ठे गले यस्य । यथोक्तम्

‘ पानाशनप्रसाधन-
संभुक्तसमस्तविश्वया शिवया ।
प्रलयोत्सवसरभसया
दृढमुपगूढं शिवं वन्दे ॥’ (उ० स्तो० १६–२९)

इति ॥ ७ ॥

अर्घपात्रमाह

प्रभूतभूतसंभूत-
शोणितैरर्घभाजनम् ।
क्रियते ते महाकाल-
कायकंकालकन्दले ॥ ८ ॥

प्रभौ व्यापके भैरवधाम्नि ऊतानि अनुस्यूतानि यानि भूतानि पञ्चात्मकशक्तिविवर्तभूतानि पृथिव्यादीनि, तत्र संभूतानि यानि शोणितानि तत्स्वरूपविगलनसमुदितचिद्रसरूपाणि, तैरर्घभाजनं महाविमर्शमयपूजनपात्रम् एकशक्तिशुक्तिविगलनरूपं सर्वेषामविकल्पभूम्यधिरोहविदारितविकल्पमयमहाकालकलेवरकरङ्ककपाले कालसंकर्षिणीधाममध्ये विधीयते इत्यलं रहस्योद्घाटनेन ॥ ८ ॥

यद्यद्विकल्पनाजालं
बाह्यार्थप्रतिपत्तये ।

तत्तद्द्वाराधिपकुलं
तव पूज्यं मनस्विभिः ॥९॥

बाह्यविषयाक्षेपकत्वात् मनोन्मनालक्षणं द्वारं तद्वासि कुलं द्वाःस्थकुलं द्वाःस्थसमूहः, विकल्परसा एव हि स्वरूपरसावेशद्रवणेन असंविभक्ता बाह्यकक्ष्यासु क्षिपन्ति, तदनु चैवं मानितास्ते स्वरूपनरपतिसमीपमर्पयन्ति, इति स्वशक्तिभागावधानेन पूज्यं स्वीकृतमनस्कैः ॥ ९ ॥

अशेषावरणोन्मुक्त-
गुप्तसौषुप्तमण्डले ।
पूज्यसे नगजाकान्त !
ग्रहणे चन्द्रसूर्ययोः ॥ १० ॥

चमनादबाह्यत्वेन अन्तरेव चिमिचिमायमानत्वात्, द्रवणाच्च बहिर्लोकयात्रात्मना प्रसरणात्, तथा सुष्ठु ऊरणात् इति चन्द्रशब्देन सूर्यशब्देन च जाग्रत्स्वप्नयोर्ग्रहणम्, तयोर्ग्रहणे आत्मसात्क-

पं० ८ ख० पु० शक्तिभावावधानेनेति पाठः ।

रणे सति, अशेषावरणैः सर्वोपाधिभिः, उन्मुक्ते गुप्तसौषुप्तमण्डले गुप्तं तिरोहितं सौषुप्तं मण्डलं यत्र तस्मिन् तुरीये धाम्नि, नगजा अविचलकूटस्थधामसमुल्लसिता शक्तिः तस्याः कान्त? विश्रामधामन्, पूज्यसे सततं संबोधनेनानुभूयसे ॥ १० ॥

हानादानोदयारम्भ-
सदसद्विभ्रमोज्झितम् ।
ज्ञप्तिमात्रप्रतिष्ठान-
मासनं त्रिजगत्पते ॥ ११ ॥

त्यागग्रहोद्गमक्रियाभावाभावविकल्पनिर्मुक्तम् अत एव मातृमानमेयोल्लङ्घनेन प्रमितिमात्रं निर्विशेषेण फलरूपमासनमुपलक्षणतया तस्यापि सापेक्षत्वात् तदपि उल्लङ्घितवतोऽव्यपदेश्यस्य तव, ते निवेद्यत इति पाठे निवेद्यते निःशेषेण वेद्यते तद्भावेन अनुभूयते, त्रिजगतो मातृमानमेयलक्ष-

पं० १६ ख० पु० भावनानुभूयते इति पाठः ।

णस्य अधिष्ठातः! हानादानादिपदार्थषट्कनिर्देश-
त्वानपेक्षमासनं सूचितम् ॥ ११ ॥

मूर्तिदानमनाभास-
शक्तिभासोपबृंहितम् ।
तुर्यपीठप्रतिष्ठानं
वितरामि जगत्पते ॥ १२ ॥

उपबृंहितम् उपबृंहणम्, बाह्यावभासरहिता-
नवच्छिन्नचमत्कारसारशक्त्यवभासरूपं, मूर्तेः मूर्छितसतत्त्वस्य किञ्चिदुच्छूनतात्मनः पारिपूर्ण्योल्लेखस्य दानं, वितरामि विमृशामि, पूर्णाहन्तया च परपदनिविष्टम् ॥ १२ ॥

दिक्कालदेशकलना-
कलङ्कोज्झितचेतसः ।
कः करोति बुधः स्थाणो-
राह्वानादिविसर्जनम् ॥ १३ ॥

स्थाणोः स्थास्नोरप्रचलितसर्वगतचिन्मात्रवपुषः पृथक् दिग्देशकालपरिगणनकल्पनाभावात् आह्वानोपक्रमं विसर्जनमवगततत्त्वः कः करोति, व्यतिरिक्तदेशकालसंभवे हि कस्यचिदानयनं कुत्रचित् प्रहाणं संभाव्येत, इह तु सर्वस्यैव तन्मयत्वात् कस्याह्वानं कुत आह्वानं, कस्य विसर्जनं कुत्र च विसर्जनमिति तत्समावेशेनैव सर्वसंसक्तिरुक्ता ॥ १३ ॥

सूर्यशीतांशुनेत्राभ्यां
मथित्वा शक्तिवारिधिम् ।
परामृतरसाभ्यङ्गं
शिवाय विनिवेदये ॥ १४ ॥

अभ्यज्यते अनभिव्यक्तमपि व्यक्तिमानीयते सृष्टिक्रमावद्योतिता येन सोऽभ्यङ्गः उपस्नेहकः, नेत्रे प्रथमसूत्रेऽपि ॥ १४ ॥

पं० १५ ख० पु० नेत्रमथनसूत्रे इति पाठः ।

इन्द्रियेष्विन्द्रियार्थेषु
 रागलोभानुयायिषु ।
निःस्नेहत्वं प्रभुत्वं च
 रूक्षमुद्वर्तनं तव ॥ १५ ॥

इन्द्रियार्थेषु शब्दस्पर्शरूपरसगन्धेषु विषयभूतेषु, इन्द्रियेषु रागलोभानुयायिषु सत्सु इति व्यधिकरणे सप्तम्यौ, निःस्नेहत्वं प्रभुत्वं चात्यन्तायुक्तिरनभिष्वङ्गस्तदधिष्ठातृत्वेन वा स्फुरणम्

'बुद्धवत्सर्वरागी स्यात्सर्वद्वेष्योऽथ भैरवः ।'

इति न्यायेन उद्वर्तनमशेषवासनोन्मूलनम्॥१५॥

संशोध्यानच्छकलया
 बैन्धवं तीर्थमञ्जसा ।
तद्दिरामरसस्नानं
 देयं चन्द्रार्धमौलये ॥ १६ ॥

महानादाद्यकलावचूलाय षोडशस्वररूपकला-

पं० १५ ख० पु० षोडशांशरूपकलाकलापारम्भकावर्णशिरोङ्कशेति पाठः ।

कलापारम्भाद्यवर्णरूपशिरोङ्कुशरूपया अनच्छक-
लया बैन्धवं तीर्थम् उभयशून्यबिलरूपं संशोध्य
निर्ग्रन्थिबन्धं विधाय, निरोधनादनादान्तवर्ति-
परमतृप्तितालक्षणरसेन कार्यमभिषेचनम् ॥१६॥

स्वप्रबोधाम्बरोदार-
विकसद्वस्त्रघर्षणम् ।
विनिवेश्य भवत्संवि-
द्विकिरान्विकिरामहे ॥ १७ ॥

स्वप्रबोधः स्वविमर्श एव अम्बरम् अनावर-
णत्वात् व्योम अत एवोदारमुद्भटं विकसत् सर्वा-
त्मतया प्रसरत् सोल्लासितकार्याच्छादकतया वस्त्रं
तेन घर्षणं प्रत्यावृत्तिनयेन स्वावधानं विधाय,
प्राप्ते महासामरस्ये, विगलितेषु द्वैतोदयमहासंत्रा-
सडम्भरेषु अखण्डितस्वावबोधनिर्मत्सरबलीन् सर्व-
तोदिक्कं क्षिपामः ॥ १७ ॥

पं० १२ ख० पु० महामन्त्राडम्बरेषु इति पाठः ।

ज्ञानज्ञेयपरित्याग-
नगनिर्झरविस्रुतम् ।
परमानन्ददं मेऽन्त-
स्तव पाद्यमनाविलम् ॥ १८ ॥

उभयोरपि सापेक्षत्वेन अनुपपद्यमानस्वरूपत्वात् जडाजडयोः त्रिष्वपि कालेषु चिदतिरेकेणाभाव एव अगमनात् अविचलत्वात् नगः तत्र यो निर्झरो निर्गतो झरो वयोहानिरूपः कालः यस्मात् तादृक्स्वरूपं ततः प्रवृत्तं परचमत्काररूपं पाद्यम् 'झॄष्-वयोहानौ' इत्यस्य झर इति रूपम् 'ॠदोरप्' ॥ १८ ॥

अमन्दानन्दनिःष्यन्द-
स्पन्दमन्दिरकन्दरात् ।
गलत्कैवल्यसलिल-
मादत्स्वाचमनं विभो ॥ १९ ॥

गुणादिस्पन्दनिःष्यन्दिषु यत् सामान्यस्प-

न्दरूपम् अक्रमप्रकटितनिमेषोन्मेषसृष्टिस्थिति-प्रकारम् ईषदुच्छूनतया किंचिच्चलनात्मकमपि तदेव मन्दिरं सर्वस्य प्रथमनिवासित्वात् अम-न्दोऽनवच्छिन्न आनन्दनिःष्यन्दोऽहमित्युल्लेख-चमत्कारप्रसरो यत्र तादृशस्पन्दमन्दिरस्य कन्द-रात् अगाधात् धाम्नः, उन्मिषदनन्यत्वरसरूपमा-चमनं गृहाण कैवल्यरसमपि संहर, इति कोऽपि बन्धमोक्षोत्तीर्णो नय उन्मीलितः 'मन्दरकन्द-रात्' इति वा पाठः ॥ १९ ॥

प्रक्षाल्य धारणाम्भोभि-
ग्रन्थिपञ्चकमौक्तिकम् ।
अनर्घ्यमर्घं पादेभ्यः
प्रयच्छामि वृषाकपे ॥ २० ॥

हे वृष स्वशक्तिरसवर्षणप्रवण! तथा अकपे अचपल—कूटस्थ! ग्रन्थिपञ्चकम् इन्धिका-दीपि-

---

पं० ३ ख० पु० निवासत्वात् इति पाठः ।

का-रोचिका-मोचिका-ऊर्ध्वगालक्षणं, मनोग्रथनात् धारणा वारुण्याद्या देशबन्धरूपाश्चित्तस्य ता एव अम्भासि तैरष्टोत्तरशतसंख्यातान्तिकमुख्यसंप्रदायसिद्धिभूमिकोलङ्घनक्रमेण अमलतामासाद्य, अनर्घ्यममूल्यम् — अतुल्यत्वात् ॥२०॥

तुरीयोद्यानविकस-
त्संवित्सौरभनिर्भरैः ।
गिरीश तिसृभिर्वाग्भिः
स्तुतिपुष्पैः प्रपूज्यसे ॥ २१ ॥

गिरि वाग्विषये ईश स्वामिन्, तुरीयोद्याने परास्वरूपकानने विकसत् यदेतत् संवित्सौरभं बोधामोदः तन्निर्भरैः, स्तुतिरूपैः पुष्पैः, तिसृभिर्वाग्भिः पूज्यसे । तत्र पश्यन्त्याः तावत् स्वरूपाव्यतिरिक्तान्तास्फुटतेदन्ताहन्तावभासपरमसामरस्यरूपा स्तुतिः, मध्यमाया अपि ग्राह्यग्राहकाकल्पकल्पनानल्पस्फुरत्तातात्पर्यपर्यवसितोऽपि

अविलुप्तस्वावभासस्तव स्तवस्तवकः, वैखर्यास्तु मौखर्येण स्फुटघटपटादिनटनलाम्पट्येऽपि सर्वतोदिक्कप्रथितपरमेश्वररूपातिरेकिवाच्यान्तरविरहात् सततमेव तदनुशंसैव कुसुमिता मिताभिधाननिर्णयनिर्दलनतात्पर्यपर्यवसिता इत्युक्तं भवति ॥ २१ ॥

प्राणवह्निशिखास्त्रेण
भङ्क्त्वा ब्रह्मबिलं लसत् ।
धूपवर्तिनिभाभासो
धूपस्ते नगजाधव ॥ २२ ॥

प्राणोद्दीपिता येयं वह्निशिखा—आग्नेयधामकोटिः, सैव अस्तात् त्रायते इति अस्त्रम्, अथ वा निष्कलनाथोऽत्र उद्धृतः, तेनैव हिक्कापातोद्दीपितेन ग्रन्थिभेदनक्रमेण ब्रह्मग्रन्थिभेदात्, तत्र प्राणो 'ह' वह्निशिखारूपमस्त्रम् इत्यादि, सर्वप्र-

पं० ९ क० पु० धूपयन्ति निभेति पाठः।

मेयजातं धूपयति सर्वं स्वपरिस्पन्देनाधिवासयतीति धूपः ॥ २२ ॥

अनाहता नदत्यन्त-
यां गौर्धाम्नि परे परा ।
सा घण्टा वाद्यते शम्भो-
रग्रे ग्रन्थार्थगर्भिणी ॥ २३ ॥

अघंटसिदिति त्रोटयति इति अघण्टा, परा प्रकृष्टा, ग्रन्थार्थगर्भिणी – अन्तरितसकलवाच्यवाचककलापा ॥ २३ ॥*

कन्दानलोल्लसच्छक्ति-
शिखां दीपशिखोपमाम् ।
उद्दीपयामि भगव-
न्मोहध्वान्तापनुत्तये ॥ २४ ॥

---

* अस्य पद्यस्य व्याख्यानमसमञ्जसं खण्डितपूर्वभागं च प्रतिभाति द्वयोरादर्शपुस्तकयोस्तथादर्शनात् यथावदेवोपन्यस्तम् । [परे धाम्नि द्वादशान्ते अन्तरस्फुटतया अनाहता स्वयमुच्चरन्ती या परा वाक् नदति, सा घण्टा वाद्यते इत्यन्वयेन संगतः पदार्थः]

कन्दानलात् आधारमध्यधाम्नः उल्लसन्ती शक्तिशिखा बिन्दुरूपा, तां शाक्तस्फारोद्दीपनात् दीपरूपां नादसूचिशेखरमुद्रानुप्रवेशेन उद्दीपयामि ॥ २४ ॥

वृत्तित्यागामृतकला-
चन्द्रश्चन्द्रकिरीटिनः ।
समालम्भनवेवास्तु
मुमुक्षूणां विमुक्तये ॥ २५ ॥

प्रमाणविपर्ययविकल्पनिद्रास्मृतिवृत्तिप्रहाणपरिशिष्टतदनुप्राणकाविनाशबोधघनसाररूपं सम्यक् आलम्भनं समालम्भनं, सर्वाच्छुरणात् समालम्भकं वा तादृशा एव हि मुमुक्षवो मुच्यन्ते इति । तदुक्तमुत्पलदेवपादैः

‘योऽविकल्पमिदमर्थमण्डलं
पश्यतीश निखिलं भवद्वपुः ।
स्वात्मपक्षपरिपूरिते जग-
त्यस्य नित्यसुखिनः कुतो भयम् ॥’

इति ॥ २५ ॥

नादशक्त्युदितं धाम
मलत्रयविवर्जितम् ।
उष्णीषमस्तु ते रुद्र
विद्रावितनभोऽर्गलम् ॥ २६ ॥

नादशक्तेः बिन्दूर्ध्वकलाया उदितम् उपरिगतं नादान्ततेजोव्यपदेश्यं प्रकाशकत्वात् धाम, तदेव अवच्छेदहेतुना आणवादिना मलत्रयेण विरहितम्, तथा विद्रावितनभोऽर्गलम् क्षपितपरव्योमानुवेधनिरोधकग्रन्थिचक्रम्, उषणे विकल्पप्लोषणे ईशम् उष्णीषमिति अक्षरसाम्येनापि निरुक्तिः ॥ २६ ॥

भवद्भक्तिसुधासार-
संप्लावितहृदम्बुधेः ।
प्रोल्लसद्ब्रह्मकमल-
ममलं तेऽस्तु शेखरम् ॥ २७ ॥

पं० ६ ख० पु० नादान्तभेदेन व्यपदेश्यमिति पाठः ।

अनुग्रहशक्तिरूपभक्त्यमृतवर्षागाधीकृतहृत्समुद्रप्रतिभातब्रह्मपुण्डरीकं शिखान्तप्रान्तकोट्यवभासनात् शेखरम् ॥ २७ ॥

बोधारबिन्दसंदोहो
हर हारलता तव ।
नित्योदितान्तरव्याप्ति-
कला चन्द्रकला च ते ॥ २८ ॥

नानाकारकरणेश्वरीसमुपहृतविषयोपहारहारलतावतस्तदैक्यसमापत्तिमहाकाशव्याप्तिरेवाह्लादनदीप्तिधात्वर्थानुगमात् चन्द्रकला, तवेति चन्द्रकमलमीलननयः कोऽपि गुरुमुखरहस्यक्रम उद्दीपितः ॥ २८ ॥

आकृष्यार्ककरैः शाक्तै-
र्विश्वाकाशकुशेशयात् ।
चिच्चन्द्रामृतनिःष्यन्द-
मास्वादय जगत्पते ॥ २९ ॥

विश्वाकाशकुशेशयात् प्लावकरसयुक्त्या अखिलविगलनक्रमेण । तदुक्तं मया चक्रेश्वरभैरवाष्टके

‘ भूतचतुष्टयकवलन-
बृंहिततनुगगनमप्यनुच्चण्डम् ।
परमाणुवत्प्रहीणं
यत्र नभस्तन्नुमः शैवम् ॥ ’

इति । शाक्तैरर्ककरैर्महाकालसंकर्षिणीकिरणैः चिद्रूपचन्द्रपीयूषरसचर्वणेन चिन्नभसोऽपि उ........ ....णतापादनानन्तरसकलधामघट्टनात् घोराघोरघस्मररावारावविद्रावणचक्रातिचक्रोत्तरमहास्फारमयमहामुद्राविद्रावणानुत्तरपरपरिस्पन्दसौन्दर्यावद्योतनेनामावस्यावासनावासितः कोऽपि संप्रदाय उट्टङ्कितः ॥ २९ ॥

मन्त्रं मनसि तच्छक्तौ
तां स्वधाम्नि सदोदिते ।
कृत्वा जपविधिं सम्यक्
शिवाय विनिवेदये ॥ ३० ॥

पं० ४ ख० पु० गगनमध्यमुच्चण्डम् इति पाठः ।

'सहस्रो मानस' इति नीत्या मन्त्रमनाहतसततोच्चरदकुलभट्टारकाकारम्

'आ गोपालाङ्गनाबालम्लेच्छाः प्राकृतभाषिणः ।
अन्तर्जलचराः सत्त्वास्तेऽपि नित्यं ब्रुवन्ति तम् ॥'

इति प्राणात्मिककलांशांशिकास्थितसमस्ततिथिविषुवदयनपरिगमपूरपूरिताशेषजपफलमेकोच्चारविप्रसृताक्षमालाक्षमालोपरिगताद्यन्तकर्मस्पन्दमेरुपर्यावृत्तिदर्शितसृष्टिसंहारं मनसि अवधानमये कृत्वा, तदपि मनः प्राप्तमन्त्रसामरस्यं शक्तौ प्रथनप्रथमवीर्ये कृत्वा, शक्तिमपि निजमहिमनि नित्यमपरित्यक्तसार्वात्म्यसर्वोत्तीर्णतातिरेकमहोदये सर्ववर्णानां शक्तिक्रमस्फुरिततत्तत्स्वरूपानुप्राणनेन स्वरूपलाभात् । तदुक्तम्

'तदाक्रम्य बलं मन्त्राः'

इति। एवंविधं जपमकरणकरणेन निर्वर्त्य, शिवाय स्वात्ममहेश्वरे तादर्थ्येन विशेषेण निरवशेषं बुद्ध्वे सम्यक्, इत्येवंविधमहावीर्यस्फारसामरस्यमयसत-

तोदितजपावधानातिरेकेण पशूनां जप उच्चरितप्रध्वंसिवर्णनिर्वर्त्यः, एतत्परमार्थतायामपि निर्वीर्यबीजतया न सम्यक्सिद्धिसाधनभावमश्नुत इति उक्तं भवति ॥ ३० ॥

निःशेषार्थपरित्यागे
ग्रहणे वामितद्युते ।
अनाविलां परां व्याप्तिं
मुद्रां बध्नामि धूर्जटे ॥ ३१ ॥

धुनोति सर्वं, रंहति सर्वत्र, जनयति सर्वं, टीकते सर्वत्र इति आगूरिताक्रमचतुष्टयार्थो धूर्जटिः। एतां लयोदयमुद्रामेकामपि पञ्चधा वक्ष्यमाणनयेन स्फुरन्तीं बध्नामि आत्मसात्करोमि । अखिलार्थपरिहारे वा स्वीकारे वा अस्खलनात् अपरिच्छिन्नमहिमन्?, वेद्यवेदककालिकाभिः अकलुषिताम्, अकृत्रिममहाव्याप्तिमयीम् । इयमेव च अन्तर्लक्ष्यबहिर्दृष्टिभावेन त्यागग्रहाभ्यां भैरवी, अखिलास्वादचमत्कारस्फुरणाभ्यामपि त्यागग्रह-

विग्रहा लेलिहाना, सर्वपरिक्षपणेन च स्वावशेष-
मात्रेणापि त्यागग्रहात्मिकैव करङ्किणी, स्वरूपा-
क्षमतायामपि तद्ग्रासगृध्नुस्फुरत्तासारैव तद्रूपैव
क्रोधिनी, परव्योम्नि व्याप्त्युन्मिमिषासंजिहीर्षा-
त्मकोल्लासोपशमसाध्यैव खे चरतीति खेचरी इत्ये-
तल्लक्षणलक्षिततयैव सर्वमुद्राणामियमेकैव पञ्चधा
प्रसरन्ती तत्तद्वचनभेदैश्चर्च्यते चर्च्यते च ॥३१॥

शष्कुलीकर्णयोर्बद्धा
यो रावोऽत्र विजृम्भते ।
तद्गीतमथ ते वाद्य-
माद्यसंपुटघट्टनात् ॥ ३२ ॥

श्रोत्रपुटिकाबन्धयोः योऽन्तर्निनदन्निव सामा-
न्यस्वररूपो योऽसौ, गीतं स एव, आद्यकन्दो-
भयपक्षसंकोचात् नानानाडीवेणुवने विचरन् उप-
जनितततघनसुषिरतारमन्द्रमध्यमभेदाङ्कुरितक-
लाप्रस्तारास्तृतचञ्चत्पुटचाषपुटपञ्चपाणिप्रमुख-

मुखरतरतारभेदो वाद्यभावं भजते। 'शष्कुलीकर्णयोरन्तर्' इति वा पाठः—गोलकतच्छक्त्योरेन्तरित्यर्थः। गोप्य इति पाठे भगवत आमन्त्रणम् स्वप्रकाशत्वादनन्यप्रकाश्य! इत्यर्थः, शष्कुलीकर्णयोराद्यसंपुटघट्टनात् यो रावस्तद्गीतमिति अन्वीयते॥ ३२॥

भवद्भावरसावेशा-
त्ताण्डवाडम्बरोद्धतः।
मन्त्राध्वनि नदाम्यन्तः
किमु बाह्यार्थभावनैः॥ ३३॥

त्वन्मयतोत्कर्षेषु शृङ्गारादिष्वपि रसेषु आवेशात्त्वदनुकारिविकीर्णनिजमरीचिमयकरकल्पितसंकीर्णासंकीर्णपताकादिसमुद्बोधितभाववैभवाभिनयो भवाभवोद्धट्टनविघट्टनजवनिकाप्रवेशनिर्गमनाकम्पितस्वरूपोऽपि नृत्तमारभे, तदुक्तं मया शिवरात्रिविचारवार्तिके

पं० १ क० पु० बाह्यभावमिति पाठः।

पं० ७ ख० पु० भवद्भक्तिरसेति, डम्बरोद्यत इति च पाठः।

‘नित्यमात्तकरणक्रमोन्मिष-
च्चित्रभावशतसंनिवेशिनीः ।
निष्क्रियो निजमरीचिनर्तकी-
र्नर्तयामि परनृत्तदैशिकः ॥’

इति । मन्त्राध्वनि ध्वनिधामनि गुप्तभाषणप्रवणपश्यन्तीपदे, यद्वा वाच्यवाचकाध्वषट्कमध्यवर्तिपञ्चमन्त्रमहिमनि, नदामि चिद्भैरवैकघनताप्रमोदेन गर्जामि । किं वराकैर्बाह्यविषयविकल्पातङ्कैः, इति पररसपरितृप्तिमहोद्गारं प्रकटयति ‘न माम्यन्तः किमु बाह्येऽत्र भौवने’ इति वा पाठः, तत्र न मामि न वर्ते किमु भौवने कलादौ अकलान्ते भुवनाध्वनि इत्यर्थः ॥ ३३ ॥

अखण्डमण्डलाकार-
शिवताभावनाम्बरम् ।
उपरिष्टान्मया शम्भो-
र्वितानमुपकल्पितम् ॥ ३४ ॥

पं० ८ ख० पु० विकल्पाडम्बरैरिति पाठः ।

वितनोति सर्वं वितन्यते वा सर्वत इति वितानम् ॥ ३४ ॥

रेचयित्वा करन्ध्रेण
भाचक्रं हृदयाम्बरात् ।
धार्यते धूर्जटेरग्रे
चारुचामरवन्मया ॥ ३५ ॥

प्रबुद्धकुण्डलिनीस्पष्टीभावभासुरमध्यमधामदण्डानुप्रेरणप्रयत्नप्रसृतब्रह्मबिलोत्कालितबैन्धवदीप्तिवृन्दं हृदयगगनप्रसृतं त्रिविधतापहारितया चामरं धारयामि ॥ ३५ ॥

नासापुटकुटीकोटि-
विसृतैः प्रसृतैः पुरः ।
तालवृन्तैरिव विभो
वीज्यसे हंसमारुतैः ॥ ३६ ॥

विसृतैः प्रविष्टैः, प्रसृतैर्निर्गतैः, हंसमारुतैः प्राणपवनैस्तालवृन्तैरिवोत्क्षेपकतुल्यैः ॥ ३६ ॥

सर्वातपविनिर्मुक्तं
भवद्भक्तिसुधासितम् ।
आतपत्रमथास्माभि-
र्धार्यते ते महाशय ॥ ३७ ॥

विषयासङ्गकलिलरहितं, त्वन्मयतामृतविमलं छत्रं धार्यते ॥ ३७ ॥

ममतामन्दुरात्यागा-
त्त्रैलोक्याकर्षणक्षमः ।
अहंकारतुरङ्गस्ते
वाहनाय प्रकल्पितः ॥ ३८ ॥

भवनिरावरणविजययात्रोपक्रमे नियताहन्ताममतापरिक्षये पूर्णाहन्तात्मकोऽहङ्कारो हयस्त्वदतिवाहनाय ॥ ३८ ॥

स्वसंविन्नन्दनानन्द-
नागवल्लीदलोज्ज्वलम् ।

स्फुरत्स्पन्देन्दुसुरभि
ताम्बूलं ते निवेद्यते ॥ ३९ ॥

ताम्बूलं – ताम्रभवामूलम् अखिलोपरञ्जकत्वात्, निजबोधानन्दनन्दनोद्यानप्रफुल्लो, नागः शारीरः पवनविशेषः तस्य वल्ली प्रथमप्राणोद्भेदशक्तिः तत्संपत्तिकासुन्दरम्, उद्गच्छदाद्यच्छाचिमिचिमिकाकर्पूरवासिता – उभयोरपि सर्वचमत्कारकत्वात् ॥ ३९ ॥

भोग्यभोक्तृविभेदोत्थ-
वासनेन्धनसंचयम् ।
अद्वैताग्नौ जुहोम्यन्तः
शांकरे श्रेयसां निधौ ॥ ४० ॥

भोग्यभोक्तृविभागतदुद्गतवासनादारुविसरम् अविभागशम्भुधाम्नि सामरस्यं लम्भयामि ॥४०॥

प्रकाशाकाशहस्ताभ्या-
मवलम्ब्योन्मनास्रुचम् ।

धर्माधर्मगलत्स्नेह-
पूर्णां वह्नौ जुहोम्यजे ॥ ४१ ॥

अजे सर्वादिसिद्धे पूर्वोदिते शिवधामहव्यभुजि ग्राह्यग्राहकभेदवासनेन्धनदहनसमेधिते स्वरस-विगलितप्रियाप्रियफलधर्माधर्मनिबद्धवासनाघृत-पूर्णाहुतिं जुहोमि अविमर्शतद्विरामरूपसमनोन्म-नापाणिभ्यां सूक्ष्मकरणशक्तितदुपरमाङ्गुलिपञ्च-कोपशोभिताभ्यां तदुपरिवर्तनात् 'उन्मन्यन्ते परः शिव' इति दृशा उन्मनास्रुचं परिगृह्य पूर्णां जुहोमि, इति संक्षयप्रधानायामपि वृत्तौ अविलु-प्तमेव पारिपूर्ण्यम्—इति पूर्णशब्ददेवतैकात्म्यमयः कोऽपि नयः प्रथितः। उक्तं च मयैवाकुलका-लिकात्रिंशिकायाम्

'स्वानन्दतस्त्रिभुवनं कवलं विधाय
स्वात्मानमप्यतितरां समदा ग्रसन्ती।
तृप्ता तथाप्यपरिखण्डितनित्यसिद्ध-
स्वातन्त्र्यपूर्णविभवा कृशमूर्तिरव्यात् ॥'

इति ॥ ४१ ॥

युष्मद्ध्याननिशानाथ-
किरणैरुपरञ्जितः ।
अन्तर्मानविधौ तेऽस्तु
चित्तचिन्तामणिर्मम ॥ ४२ ॥

बाह्यव्यावृत्तिविगमपूर्वकम् अन्तर्मननम् अनन्यतया स्फुरणम् अन्तर्मानं तद्विधौ, त्वदनुभवशशिप्रकाशविवशीकृतः, चित्तमेव चिन्तामणिर्भवत्समावेशेन तद्वदेव संकल्पमात्रेण सर्वसमुल्लासात् ॥ ४२ ॥

मोक्षलक्ष्मीकराम्भोज-
पात्रे विन्यस्य संस्कृताम् ।
निवेदयामि भगवन्
प्राणसर्वस्वदक्षिणाम् ॥ ४३ ॥

प्राणा एव तेषां वा सर्वस्वम् आणवं स्वरूपं, तत् निवेदयामि – मायीयपारिमित्याभासनिरास-समुपलब्धसततासिद्धपरपारिपूर्ण्यबृंहिततया निः-

शेषतो वेदयामि । मोक्षलक्ष्म्या भवौन्मुख्यपरावृत्तायाः संविद्देव्याः कराम्भसि परमवीचिनिःष्यन्दे जातं यत् पात्रं पातत्राणात्मकम् अविलुप्तम् अवधानं, तदर्पितं कृत्वा, संस्कृतां कृतशास्त्राचार्यसंप्रदायोपस्कराम् । तदेवं मायोपकल्पिततत्तदवच्छेदविच्छेदिक्रमाक्रमचक्रचारमहासामरस्यसमापत्तिप्रतिपादनेन यदेव ‘ नमः सूर्यकला ’ इत्यादिना प्रक्रान्तं तदेव पर्यवसितम् ॥ ४३ ॥

संसारवारिधेः सन्तः
परं पारं तितीर्षवः ।
चन्द्रमौलेः श्रयन्तूच्चै-
र्भावपूजातरण्डकम् ॥ ४४ ॥

श्रयन्तु अवधानेन सेवन्ताम्, भावपूजामयं तरण्डकं पोतम् ॥ ४४ ॥

इत्थमीशानचरण-
नुतेर्यत्समुपार्जितम् ।

पं० १५ ग० पु० ईशानचरणौ नुत्वा इति पाठः ।

श्रेयस्तेन जगत्कृत्स्नं
द्वेषदोषाद्विमुच्यताम् ॥ ४९ ॥

नियतदर्शनावग्रहग्रहसमुद्गतदर्शनान्तरानिर्भर्त्सनाखण्डनसमयलोपात् जगत् विमुक्तमस्तु, नियतदर्शनहेवाकिता हि सर्वोदयविश्रामभूमिभूतपरतत्त्वपरिखण्डनत्वामरत्वात् सर्वस्यैव परः प्रकारः। तदुक्तं मया कृतान्ततान्तिशान्तिस्तवे

'मायेयं बहुरूपतामुपगता नाना यथा ते विभो
विद्याप्येवमनन्तभेदगहना नो चेत्कथं स्यादिदम्।
नैःस्वाभाव्यगमेन केचन परे वैवित्त्यतः केऽपि वा
सार्वात्म्येन परे तदुत्तरदृशा मुक्ताः परे सर्वतः॥'

इति। अद्वयद्वादशिकायामपि

'यद्यतत्त्वपरिहारपूर्वकं
तत्त्वमेषि तदतत्त्वमेव हि।
यद्यतत्त्वमथ तत्त्वमेव वा
तत्त्वमेव ननु तत्त्वमीदृशम्॥'

इति॥ ४९॥

पं० ६ ख० पु० संसारस्यैवापर इति पाठः।

पं० १६ ख० न च तत्त्वमिति पाठः।

स्तोत्रं गृहाण परमेश्वर विश्वसाक्षिन्
मानावमानममतोज्झितचित्तवृत्तेः ।
मत्तस्त्वदङ्घ्रियुगपीठनिलीनमौले-
र्भस्मावगुण्ठिततनोर्नृकपालपाणेः ४६

विश्वस्य साक्षी विश्वरूपो वा आमन्त्र्यते, मानावमानयोः ग्रहणाग्रहणयोः निष्प्रपञ्चप्रपञ्चयोः ममतया उज्झिता चित्तवृत्तिर्यस्य तद्युक्ता वा त्यक्ता चित्तवृत्तिर्येन, अंहः पापं हरति इति, अहंकृदेव वा अङ्घ्रिः तद्युगम् अनावरणज्ञानक्रियारूपं तस्य पीठं परमशिवरूपं तत्र निलीनमौलेः प्रशान्तकरणचन्द्रपञ्चककचितचित्तशेखरस्य, तथा भस्मना कारणपञ्चककञ्चुकोपचयप्लोषपरिशिष्टेन अखिलभूतिहेतुना अवबोधभूतिविभवेन अवगुण्ठिता आच्छादिताः तनवः मिततया स्फुरन्तः सर्वभावा येन, नुः अणोर्यत्कपालं, कं महास्वातन्त्र्यरूपम् अनवच्छिन्नं ब्रह्म पालयति गोपायतीति नृकपालं

कर्परं तत् पाणौ एकस्मिन् उद्धुभूषामरीचिलक्षणे मिततया इयत्तया तुलितं यस्य स तथोक्तः ४६

महापाशुपतोद्याने
कश्चिद्विश्रम्य तापसः ।
चक्रे चिच्चक्रनाथस्य
शम्भोर्भावनुतिं पराम् ॥४७॥

‘निरस्तशास्त्रार्थविकल्पजाला
देव्यः श्मशाने करवीरकाख्ये ।’

इति दृशा भस्मशब्दव्याख्यानवर्णितस्वरूपे महापाशुपतोद्याने, भैरवाणां पशूनां पतिरकलितचिच्चक्रेश्वरात्मकः तदुद्याने तदूर्ध्वयाने सर्वातिशायिनि, विश्रम्य अनन्यतया प्रतिष्ठां प्राप्य, अत एव कश्चित् अज्ञायमानपशुपरिकल्पितनियतसंज्ञावच्छेदो, महति तपसि चित्समावेशमये भवः तापसः चिच्चक्रनाथस्य

‘सर्वसंविन्नदीभेदाभिन्नविश्रामभूमये ।
नमः प्रमातृवपुषे शिवचैतन्यसिन्धवे ॥’

इत्यादिना राजानकोत्पलदेवनिर्वर्णितस्वरूपस्य शम्भोः श्रेयःप्रभवस्य भावेन सर्वभावैक्यसमापत्तिसमावेशमयेन नुतिं परां चक्रे, इति चक्रनाथ-चक्रेशब्दाभ्यामात्मनः चक्रपाणिनाम द्योतयति ॥ ४७॥

'अदृष्टविग्रहागतं
मरीचिचक्रविस्तरम् ।
अनुग्रहैककारणं
नमाम्यहं गुरुक्रमम् ॥'

योगानन्दाभिधानद्विजवरवदनायातपीठेशिदेवी-
पादावद्योतिताज्ञप्रणयनजनितानन्तसोत्साहहर्षः ।
स्तोत्रे भावोपहारे विवरणमकरोद्रम्यदेवो द्विजन्मा
जन्माद्यायासभङ्गप्रवणमतिलसत्सद्रहस्योपदेशः ॥

इति श्रीचक्रपाणिनाथविरचिते भावोपहारस्तोत्रे विवरणं समाप्तम्
कृतिस्तत्रभवद्भट्टज्योग्देवात्मज-भट्टश्रीरम्यदेवस्य ॥

सद्विद्यानां संश्रये ग्रन्थविद्वद्-
व्यूहे ह्रासं कालवृत्त्योपयाते ।
तत्तत्सद्धर्मोद्दिधीर्षैकतान-
सत्प्रेक्षौजःशालिना कर्मवृत्त्यै ॥ १ ॥

श्रीमत्कश्मीराधिराजेन मुख्यै-
र्धर्मोद्युक्तैर्मन्त्रिभिः स्वैर्विवेच्य ।
प्रत्यष्ठापि ज्ञानविज्ञानगर्भ-
ग्रन्थोद्धृत्यै मुख्यकार्यालयो यः ॥ २ ॥

तत्राजीवं निर्विशद्भिर्मुकुन्द-
रामाध्यक्षत्वाश्रितैः सद्भिरेषः ।
पूर्त्या शुद्ध्या व्याख्यया संस्कृतः स्तात्
पूर्णो ग्रन्थः श्रेयसे सज्जनानाम् ॥ ३ ॥
(तिलकम्)

श्रीस्वात्मशिवार्पणमस्तु ॥

ओं नमोऽनन्तचिन्मूर्तये शंकराय ।

अथ

बोधपञ्चदशिका ।

श्रीमदाचार्याभिनवगुप्तपादविरचिता

ओं अनस्तमितभारूप-
स्तेजसां तमसामपि ।
य एकोऽन्तर्यदन्तश्च
तेजांसि च तमांसि च ॥ १ ॥
स एव सर्वभूतानां
स्वभावः परमेश्वरः ।
भावजातं हि तस्यैव
शक्तिरीश्वरतामयी ॥ २ ॥
शक्तिश्च शक्तिमद्रूपा-
द्व्यतिरेकं न वाञ्छति ।
तादात्म्यमनयोर्नित्यं
वह्निदाहिकयोरिव ॥ ३ ॥

स एव भैरवो देवो
जगद्भरणलक्षणः ।
स्वात्मादर्शे समग्रं हि
यच्छक्त्या प्रतिबिम्बितम् ॥ ४ ॥
तस्यैवैषा परा देवी
स्वरूपामर्शनोत्सुका ।
पूर्णत्वं सर्वभावेषु
यस्य नाल्पं न चाधिकम् ॥ ५ ॥
एष देवोऽनया देव्या
नित्यं क्रीडारसोत्सुकः ।
विचित्रान्सृष्टिसंहारा-
न्विधत्ते युगपद्विभुः ॥ ६ ॥
अतिदुर्घटकारित्व-
मस्यानुत्तममेव यत् ।
एतदेव स्वतन्त्रत्व-
मैश्वर्यं बोधरूपता ॥ ७ ॥
परिच्छिन्नप्रकाशत्वं
जडस्य किल लक्षणम् ।

जडाद्विलक्षणो बोधो
 यतो न परिमीयते ॥ ८ ॥
एवमस्य स्वतन्त्रस्य
 निजशक्त्युपभेदिनः ।
स्वात्मगाः सृष्टिसंहाराः
 स्वरूपत्वेन संस्थिताः ॥ ९ ॥
तेषु वैचित्र्यमत्यन्त-
 मूर्ध्वाधस्तिर्यगेव यत् ।
भुवनानि तदंशाश्च
 सुखदुःखमतिर्भवः ॥ १० ॥
यदेतस्यापरिज्ञानं
 तत्स्वातन्त्र्यं हि वर्णितम् ।
स एव खलु संसारो
 जडानां यो विभीषकः ॥ ११ ॥
तत्प्रसादरसादेव
 गुर्वागमत एव वा ।
शास्त्राद्वा परमेशस्य
 यस्मात्कस्मादुपागतम् ॥ १२ ॥

यत्तत्त्वस्य परिज्ञानं
स मोक्षः परमेशता ।
तत्पूर्णत्वं प्रबुद्धानां
जीवन्मुक्तिश्च सा स्मृता ॥ १३ ॥
एतौ बन्धविमोक्षौ च
परमेशस्वरूपतः ।
न भिद्येते न भेदो हि
तत्त्वतः परमेश्वरे ॥ १४ ॥
इत्थमिच्छाकलाज्ञान-
शक्तिशूलाम्बुजाश्रितः ।
भैरवः सर्वभावानां
स्वभावः परिशील्यते ॥ १५ ॥
सुकुमारमतीञ्छिष्या-
न्प्रबोधयितुमञ्जसा ।
इमेऽभिनवगुप्तेन
श्लोकाः पञ्चदशोदिताः ॥ १६ ॥

समाप्ता चेयं बोधपञ्चदशिका ।

कृतिर्महामाहेश्वराचार्यवर्य-श्रीमदभिनवगुप्तपादानाम् ।
प्रकाशिता च काश्मीरमहाराजाश्रितपण्डित-मुकुन्दराम-शास्त्रिणेयम् ।
मुंबई—"तत्त्वविवेचक" प्रेस.

ओं नमोऽनुत्तरप्रकाशशंकराय ।

अथ

अनुत्तरप्रकाशपञ्चाशिका ।

श्रीआद्यनाथविरचिता ।

अकृत्रिमाहमामर्शप्रकाशैकघनः शिवः ।
शक्त्या विमर्शवपुषा स्वात्मनोऽनन्यरूपया॥ १ ॥
शिवादिक्षितिपर्यन्तं विश्वं वपुरुदञ्चयन् ।
पञ्चकृत्यमहानाट्यरसिकः क्रीडति प्रभुः ॥ २ ॥
पृथगर्थमर्थवत्ता विश्वविश्वशरीरयोः ।
न विश्वविश्ववपुषोर्भिन्नता कापि तात्त्विकी ॥३॥
भेदे सत्तास्फुरत्ताभ्यां भिन्नं किं तु जगद्भवेत् ।
सत्तास्फुरत्तासंबन्धात्सत्ता भानं च तन्न चेत्॥४॥
असतः किं सतस्ताभ्यां संबन्धः सोऽयमिष्यते ।
स्वरूपलाभसुलभः संबन्धो नह्यवस्तुनः ॥ ५ ॥
न लब्धरूपसंबन्धे ताभ्यां किंचिदपेक्ष्यते ।

अपेक्षायामवस्थानं न स्यादेतस्य किंचन ॥६॥
स्वभावतः स्फुरत्ता च सत्ता च न विनाशिनी ।
विनाशानभ्युपगमे जडतापि निवर्तते ॥ ७ ॥
ततो गत्यन्तराभावाच्चिदेव परिशिष्यते ।
सतश्चिदैक्यं प्रकृतं कदाचिन्न निवर्तते ॥ ८ ॥
प्रकाशोऽनन्यतो भावः स्वातन्त्र्योल्लासकेवलः ।
परिच्छिन्नात्मिका शक्तिः शम्भोर्विश्वातिशायिनः ॥ ९ ॥
यत्प्रकाशात्मकं सर्वं तमःकेवलतां गतम् ।
यच्च किंचिज्जगदेतत्प्रकाशादतिरिच्यते ॥ १० ॥
विमृश्यसरणीं प्राप्तमित्येषा तात्त्विकी मतिः ।
अवभासैकतानानां मतिरेकात्र साक्षिणी ॥११॥
किं प्रमाणैर्वराकैस्तैश्चिदनुप्राणितात्मभिः ।
नहि वैकर्तनं ज्योतिर्दीपालोकमपेक्षते ॥ १२ ॥
शक्तिपातपवित्रेऽस्मिन्धीतत्त्वे च परीक्ष्यताम् ।
आदर्शविमलाभोगे न तु सर्वं प्रकाशते ॥१३॥

इत्थं चिदात्मकं सर्वं षट्त्रिंशद्भेदतत्त्वतः ।
आदौ शुद्धात्मकं तत्त्वं पञ्चधा तमसः परम्
॥ १४ ॥
शिवः शक्तिश्च सादाख्यमीशो विद्येति भिद्यते ।
अक्षादिशान्तवर्णात्मा निरमायि शिवेन तु
॥ १५ ॥
कलाविद्यारागकालनियतिर्बन्ध उच्यते ।
मायापूर्वो वकारादिक्षकारान्ताक्षरात्मकः ॥१६॥
पुमाञ्शक्तिर्मनो बुद्धिरहंकारादिपञ्चकम् ।
श्रोत्रादिपञ्चकं तादि टादि वागादिपञ्चकम्
॥ १७ ॥
तन्मात्रपञ्चकं चादि कादि व्योमादिपञ्चकम् ।
सिसृक्षोः प्रथमस्पन्दः शिवतत्त्वं विभोः स्मृतम्
॥ १८ ॥
इच्छैव सापरिम्लाना शक्तितत्त्वमुदञ्चयन् ।
स्वेच्छया सूचितं विश्वमाच्छाद्याहन्तया स्थि-
तम् ॥ १९ ॥

---

१ इत्थमित्यादि पद्यपञ्चकं ग्रन्थान्तरैर्विसंवाद्यर्थकमादर्शान्तरानुपलब्ध्या यथावदुपन्यस्तम् ।

स एव तत्त्वं सादाख्यं सर्वानुग्रहणोद्यतम् ।
स एवेश्वरतत्त्वं स्यात्पश्यन्विश्वमिदन्तया ॥२०॥
इदन्ताहन्तयोरैक्यमिति विद्या निगद्यते ।
स्वाङ्गकल्पेषु भावेषु मायातत्त्वं विभेदधीः॥२१॥
मायागृहीतसंकोचः शिवः पुंतत्त्वमुच्यते ।
अयमेव हि संसारी जीवो भोक्तैव दृश्यते ॥ २२ ॥
ज्ञत्व-कर्तृत्व-पूर्णत्व-नित्यत्वान्यस्य शक्तयः ।
तत्संकोचात्संकुचितः कलाद्यात्मतया मतः॥२३॥
मायात्मकं कला नाम किंचित्कर्तृत्वकारणम् ।
विद्या किंचिज्ज्ञताहेतू रागोऽभिष्वङ्गकारणम् २४
कालः परिच्छेदकरो नियतिश्चेदमेव मे ।
कर्तव्यं नान्यदित्येषा व्यवस्था यन्त्रणाकृतिः २५
प्रकृतिर्गुणसाम्यं स्यादहंकारादिजन्मभूः ।
अहं ममेदमित्येतद्बुद्धिहेतुरहंकृतिः ॥ २६ ॥
बुद्धिरध्यवसायस्य कारणं निश्चयात्मनः ।
संकल्पस्य विकल्पस्य बीजं मन उदीर्यते ॥ २७॥
वचनादेश्च शब्दादेर्वागादि-श्रवणादिकम् ।

कारणं श्रवणादीनां ग्राह्यं तन्मात्रपञ्चकम् ॥२८॥
आकाशाद्यवकाशादिकारणं भूतपञ्चकम् ।
परापराशक्तिमये शुद्धे विद्यादिपञ्चकम् ॥ २९ ॥
तदन्यदपराशक्तिरित्येतत्तत्त्वमीरितम् ।
इयं देवी परा शक्तिः शुद्धाशुद्धाध्वगर्भिणी ॥३०॥
पृथिव्यादीनि तत्त्वानि यदा लीनानि कारणे ।
तदा कारणमात्राणि बहिरुद्गमते विभुः ॥ ३१ ॥
[1]अनुत्तरेच्छे उन्मेष आनन्देशनमूनता ।
क्रियेच्छाज्ञानशक्तीनां सत्ता षट् .... ॥ ३२ ॥
इच्छेशनान्तरारूढा स्फुटास्फुटजगन्मयी ।
चत्वारः परतो वर्णाः षण्डात्मानः प्रचोदिताः ॥ ३३ ॥
अनुत्तरानन्दरूढा स्फुटास्फुटजगन्मयाः ।
चत्वारः परतो वर्णाः षण्डात्मानः प्रचोदिताः ॥ ३४ ॥
अनुत्तरानन्दशक्तिस्त्रिकोणाद्वृत्तियोगतः ।

---

१ अनुत्तरेत्यादित्रिपद्येष्वर्थासंगत्या पाठाशुद्धिः प्रतिभाति ।

तथैवोन्मेषयोगेन क्रियाशक्तेः स्फुटं वपुः ॥ ३५ ॥
उक्तं त्रिशक्तिसंघट्टात्त्रिशूलं द्वैतघस्मरम् ।
परस्परविरोधे तु कार्येषु प्रविरोहति ॥ ३६ ॥
न कथंचिदुपादेयमासां रूपमिदं भवेत् ।
बिन्दुर्वेद्यस्य संस्कारो विमर्शः सर्ग इत्यसौ ॥ ३७ ॥
कलाषोडशकाकारा शक्तिर्विजयते परा ।
तिथयः प्रतिपत्पूर्वाः पञ्चदशेति मायया ॥ ३८ ॥
सूर्याचन्द्रमसौ स्वान्तश्चरन्तौ स्थितिहेतवे ।
यथा विमर्शवपुषः सर्गस्याद्याः कलाः स्मृताः
॥ ३९ ॥
द्विधेयं मातृका देवी बीजयोन्यात्मना स्थिता ।
नित्यप्रवृत्तशृङ्गाटवपुर्विश्वस्य जन्मभूः ॥ ४० ॥
हृदयं बीजमेतस्यां सारं यत्तत्परं महः ।
वटबीजे यथा वृक्षस्तथात्र निहितं जगत् ॥ ४१ ॥
विचार्यमाणे नैवेदं कारणादतिरिच्यते ।
मृदादेः कलशादीनां तत्त्वं नान्यन्निरूपणे ॥ ४२ ॥
इत्याहुस्तत्त्ववादिन्यः श्रुतीनामन्तिमा गिरः ।

इदं सर्वं सदेवासीदग्रे इति विनिश्चयात् ॥४३॥
सत्तावाचिनि बीजेऽस्मिन्भाति माया त्विदं जगत्
विलुप्तप्रत्ययाकारमेतत्स परिशिष्यते ॥ ४४ ॥
ततो ज्ञानक्रियासारविद्येश्वरसदाशिवाः ।
शक्तित्रिशूले लीयन्ते चतुर्दशकलात्मनि ॥४५॥
ऊर्ध्वाधः सृष्टिवपुषि सर्वं लीनमतः [परम्] ।
इत्थं परस्यां संवित्तौ सर्वं संकुचितं क्रमात् ॥४६॥
अथ वा मनसातीते यत्र क्वापि निरञ्जने ।
षट्त्रिंशत्तत्त्वलहरीकलहातीतगोचरे ॥ ४७ ॥
विश्वात्मनि महामन्त्रे स्वभावे सा विलीयते ।
कुतश्चिन्मथिते धाम्नि दीप्ते केनापि हेतुना ॥४८॥
सर्वं हविरिदं जुह्वन्न दारिद्र्येण पीड्यते ।
पञ्चपञ्चात्मकं विश्वं पञ्चस्पन्दविजृम्भितम् ॥४९॥
संकोचयत्परामर्शात्सामान्यस्पन्दकेवलम् ।
अहमि प्रलयं कुर्वन्निदमः प्रतियोगिनः ॥५०॥
पराक्रमपरो भुङ्क्ते स्वभावमशिवापहम् ॥ ५१ ॥

इति षडधिकत्रिंशद्भेदप्रसक्तजगत्तनुः
प्रसरति महाशक्त्युल्लेखविचित्रमहापटी ।
जयति बहुशः स्पन्दाकारा परा चिदनुत्तरा
विमृशत जनाः किं नो भूयः स्वभावविजृम्भितम् ॥

इति श्रीमदाद्यनाथविरचिता अनुत्तरप्रकाशपञ्चाशिका समाप्ता ॥

सेयं काश्मीरभूपालसंश्रितेन प्रकाशिता ।
सता मुकुन्दरामेण सन्मुदेऽस्तु शिवेऽर्पिता ॥

मुंबई—" तत्त्वविवेचक " प्रेस.

THE KASHMIR SERIES

OF

TEXTS AND STUDIES.

KASHMIR SERIES OF TEXTS AND STUDIES.

No. XV.

THE PARĀ PRĀVESHIKĀ

OF

KṢHĒMARĀJA.

EDITED WITH NOTES

BY

MAHĀMAHOPĀDHYĀYA PAṆḌIT MUKUNDA RĀMA SHÂSTRÎ,
OFFICER-IN-CHARGE RESEARCH DEPARTMENT,
JAMMU AND KASHMIR STATE,
SRINAGAR.

PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT
OF HIS HIGHNESS LIEUT.-GENERAL MAHĀRĀJA
SIR PRATĀP SINGH SĀHIB BAHĀDUR,
G. C. S. I., G. C. I. E.,
MAHĀRĀJA OF JAMMU AND KASHMIR STATE.

BOMBAY:
PRINTED AT THE "TATVA-VIVECHAKA" PRESS.
1918.

(All rights reserved.)

श्रीमच्छ्रीकण्ठनाथप्रभृतिगुरुवरादिष्टसन्नीतिमार्गो
लब्ध्वा यत्रैव सम्यक्पटिमनि घटनामीश्वराद्वैतवादः ।
कश्मीरेभ्यः प्रसृत्य प्रकटपरिमलो रञ्जयन्सर्वदेश्यान्
देशेऽप्यस्मिन्नदृष्टो घुसृणविसरवत्स्तान्मुदे सज्जनानाम् ॥ १ ॥

तरत तरसा संसाराब्धिं विधत्त परे पदे
पदमविचलं नित्यालोकप्रमोदसुनिर्भरे ।
विमृशत शिवादिष्टाद्वैतावबोधसुधारसं
प्रसभविलसत्सद्युक्त्यान्तःसमुत्प्लवदायिनम् ॥ २ ॥

ॐ

काश्मीर-संस्कृतग्रन्थावलिः।

ग्रन्थाङ्कः १९

पराप्रावेशिका

श्रीमन्महामाहेश्वराचार्यवर्य–श्रीक्षेमराजाचार्यविरचिता

श्रीभारतधर्ममार्तण्ड-कश्मीरमहाराज-
श्रीप्रतापसिंहवर-प्रतिष्ठापिते
प्रत्नविद्याप्रकाश-(रिसर्च) कार्यालये
तदध्यक्ष-महामहोपाध्याय-पण्डित-मुकुन्दराम-शास्त्रिणा
उद्दिष्टकार्यालयस्थेतरपण्डितसहायेन
संगृह्य, संशोधन-पर्यायाङ्कन-विवरणादिसंस्करणोत्तरं
पाश्चात्यविद्वत्परिषत्संमताधुनिकसुगमशुद्धरीत्युपन्यासादिसंस्कारैः परिष्कृत्य
मुम्बय्यां
तत्त्वविवेचकाख्य-मुद्रणालये मुद्रापयित्वा प्राकाश्यमुपनीता

THE RESEARCH DEPARTMENT JAMMU & KASHMIR STATE

संवत् १९७५ खैस्ताब्दः १९१८

काश्मीर-श्रीनगर

(अस्य ग्रन्थस्य सर्वे प्रकाशन-मुद्रापणाद्यधिकाराः प्रोक्तमहाराजवर्यैः स्वायत्तीकृताः सन्ति)

Printed by
Bhiwaji Hari Shinde at the "Tatva-Vivechaka" Press,
Nos. 1, 2, 3, Khetwadi Back Road, Bombay;
and Published by
the Research Department, Srinagar, Kashmir.

ओं नमः शिवाय निखिलतत्त्वात्मने

अथ

पराप्रावेशिका

श्रीमन्महामाहेश्वराचार्यवर्यक्षेमराजविरचिता ।

विश्वात्मिकां तदुत्तीर्णां
हृदयं परमेशितुः ।
परादिशक्तिरूपेण
स्फुरन्तीं संविदं नुमः ॥

इह खलु परमेश्वरः प्रकाशात्मा, प्रकाशश्च[1] विमर्शस्वभावः, विमर्शो[2] नाम विश्वाकारेण विश्वप्रकाशेन विश्वसंहरणेन च

(१) ननु परमेश्वरः प्रकाशस्वभावत्वेऽपि किं शान्तब्रह्मवादिनामिव केवलबोधस्वभावः स्यादित्याशङ्क्याह प्रकाशश्चेति ।

(२) विमर्शो हि परिमितापरिमितत्वाभ्यां द्विधा, तत्र परिमितत्वे शून्यादिप्रमातृचितेन तेन संवित्प्रकाशस्य परिच्छिन्नत्वं मा भूदित्याश-

अकृत्रिमाहम् इति विस्फुरणम्। यदि[3] निर्विमर्शः स्यात् अनीश्वरो जडश्च प्रसज्येत। एष एव च विमर्शः – चित्, चैतन्यं, स्वरसोदितापरावाक्, स्वातन्त्र्यं, परमात्मनो मुख्यमैश्वर्यं, कर्तृत्वं, स्फुरत्ता, सारो, हृदयं, स्पन्दः इत्यादिशब्दैरागमेषूद्घोष्यते,[4]

येनाह विमर्शो नामेति, स च विमर्शो विश्वाकारेण सृष्टौ, तत्प्रकाशेन स्थितौ, स्वात्मसात्कारात्मना संहरणेन संहारे च पूर्णाहन्ताचमत्कारात्मक इति यावत्।

(३) यदीति। विमर्शविकलः सूर्यादिप्रकाशो यथा परापेक्षत्वात् जडपक्षपाती अस्वातन्त्र्यमाश्रितवान् तथैव निर्विमर्शतया संवित्प्रकाशेऽपि प्रसक्तिरापतेदिति भावः।

(४) इह शैवशासननये संवित्प्रकाशस्य विमर्शप्राधान्यमेव तत्तदागमेषु समुद्घुष्टं, स एव भिन्नभिन्नाभिरागमभाषाभिराम्नायते, यथा – चैतन्यमिति विमर्श एव मुख्यमात्मनो रूपमित्यभिप्रेत्य धर्मवाचिना शब्देन निर्देशः कृतः। तथा स्वरसोदितापरावाक् इति – वक्ति विश्वमभिलपति प्रत्यवमर्शेनेति वाक्, सैव परामर्शान्तराणामाधारभूतत्वात् पूर्णत्वाच्च परा, अत एव अनिरुद्धप्रसरत्वात् अहमिति परिपूर्णचिद्वपुषा सदोदितत्वात् स्वरसोदितेति। तथा स्वातन्त्र्यमिति, स्वातन्त्र्यं च संयोजनवियोजनादिरूपं स्वस्मात् बहिष्कृतमिदन्तापदं स्वात्मनि संयोजयति, संयोज्यापि वियोजयति, शून्यादिभूमिकायां च न्यग्भावयति, – इत्यादिलक्षणत्वेन जडाद्वैलक्षण्याधायीति। तथा ऐश्वर्यमिति विश्वसर्गादावनन्यापेक्षित्वं न तु अस्य मायागर्भाधिकारिणो ब्रह्मादेरिव परेच्छावशवर्तित्वेन नियतिनियन्त्रणावत्त्वम् इति। तथा कर्तृत्वमिति, एतदेव कर्तृत्वं यत् अलौकिकेन

अत एव अकृत्रिमाहमिति-सतत्त्वः स्वयंप्रकाशरूपः परमेश्वरः पारमेश्वर्या शक्त्या शिवादि-धरण्यन्तजगदात्मना स्फुरति प्रकाशते च । एतदेव अस्य जगतः कर्तृत्वमजडत्वं च, जगतः कार्यत्वमपि एतदधीनप्रकाशत्वमेव, एवंभूतं जगत्

कार्यकारणभावेन स्वान्तःप्रकाशैक्येन स्थितस्य शिवादेः पृथिव्यन्तस्य विश्वस्य इदन्तया समुन्मीलनं योगिनिर्माणवत् इति । तथा स्फुरत्तेति स्फुरणसंबन्धः, तद्धटादेर्नास्ति, तथात्वे हि सर्वेषां सदैव घटादिकं प्रस्फुरेत् न कस्यचिद्वेति सर्वसर्वज्ञता तद्विपर्ययो वा प्रसज्येत, अतो मम स्फुरतीति मदीयं स्फुरणमाविष्ट इत्यर्थः । सारमिति अतुच्छं रूपं, सा परमेश्वरस्य विमर्शशक्तिरेवेति । हृदयमिति विश्वप्रतिष्ठास्थानत्वात् । स्पन्द इति अचलस्य चित्प्रकाशस्य चलत्ताभासनं, यत् तत्र अनतिरिक्तत्वेपि अतिरिक्ततयेव विश्वावभासनमित्यर्थः ।

(५) विमर्शशक्तिमाहात्म्यादेव परमेश्वरो विश्ववैचित्र्यप्रथात्मना स्वात्मनैव समुल्लसतीति प्रतिपादयन् विमर्शशक्तिलक्षणमुपसंहरति अत एवेति । मायाप्रकृत्यादेर्जगत्सृष्टौ कारणान्तरस्य भेदाभेदविकल्पैरुपहतत्वात् न तत्कर्तृत्वमुपपद्यते इति भावः ।

(६) यद्विश्वात्मना परमेश्वरस्य प्रस्फुरणम् इदमेव पारमार्थिकं कर्तृत्वं, तत्स्फुरणात्मनैव प्रकाश्यमानस्य विश्वस्याजडभावोऽपि स्यादित्याह एतदेवेति ।

(७) ननु जगद्विषयं कीदृक् कार्यत्वं भेदेनाभेदेन वा, भिन्नत्वे त-

---

पं० २० ख० पु० भिन्नत्वे हि इति पाठः ।

प्रकाशरूपात् कर्तुर्महेश्वरादभिन्नमेव, भिन्नवेद्यत्वेऽप्रकाशमानत्वेन प्रकाशनायोगात् न किंचित्स्यात्, अनेनं च जगता अस्य भगवतः प्रकाशात्मकं रूपं न कदाचित् तिरोधीयते, एतत्प्रकाशनेन प्रतिष्ठां लब्ध्वा प्रकाशमानमिदं जगत् आत्मनः प्राणभूतं कथं निरोद्धुं शक्नुयात्, कथं च तन्निरुध्य स्वयमवतिष्ठेत, अतश्चास्य वस्तुनः साधकमिदं बाधकमिदं प्रमाणमित्यनुसंधानात्मकसाधकबाधकप्रमातृरूपतया चास्य सद्भावः, तत्सद्भावे किं प्रमाणम्? —इति वस्तुसद्भावमनुमन्यतां, तादृक्स्वभावे किं प्रमाणम्? —इति प्रष्टृरूपतया च पूर्वसिद्धस्य

त्कर्तुः परमेश्वरस्य स्वातन्त्र्यं नाम विघटेत, अभिन्नत्वे कथं तत् इत्याशङ्क्याह जगत इति । अस्य जगतः परप्रकाशं विना अचेत्यमानत्वात् स्वात्मलाभो दुर्घटः, तदाश्रयत्वावलम्बनात् तत् प्रकाशशरीरतामेतीत्येतदेव कार्यत्वं, केवलं मायास्वातन्त्र्येण भेदोद्भासनादभिन्नत्वेऽपि भिन्नव्यवहार इति भावः ।

(८) अभेदत्वे विश्वं भातुं प्रगल्भेत, अन्यथा स्वरूपशून्यत्वात् विश्वव्यवहारो हानादानादिरूपो विनश्येदित्याशयेनाह भिन्नवेद्यत्वे इति ।

(९) ननु यदि जगत् परमेश्वरादभिन्नं तत् प्रकाशैकरूपस्य जगतो भासमानत्वात् परमेश्वरे सारूप्यभेदो दुर्वारः, तेनापि तस्य तिरोधीयमानत्वं भवेदिति शङ्कां निवारयन्नाह अनेनेति । प्रत्युत स्वात्मनि लब्धेऽपि प्रकाशावरणात् स्वयमेव नष्टं भवेदित्यर्थः ।

(१०) ज्ञापकादिकारकाणि पूर्वसिद्धे ईश्वरे व्यापरीतुं न शक्नुवन्ती-

महेश्वरस्य स्वयंप्रकाशत्वं सर्वस्य स्वसंवेदनसिद्धम् । किं च[11] प्रमाणमपि यमाश्रित्य प्रमाणं भवति तस्य प्रमाणस्य तद्धीनशरीरप्राणनीलसुखादिवेद्यं चातिशय्य सदा भासमानस्य वेदकैकरूपस्य सर्वप्रमितिभाजः सिद्धौ अभिनवार्थप्रकाशस्य प्रमाणवराकस्य कश्चोपयोगः[12] । एवं च शब्दराशिमयपूर्णाह-

---

ल्याशयं गृहीत्वा तद्विध्यादिकर्तुः प्रमातुरपि ताद्रूप्येण सत्त्वात् न तत्सिद्धिः प्रमाणाधीना, इत्यतः स्वप्रकाशत्वं तस्यानुभवसिद्धमित्याह अतश्चास्येति

(११) संवित्प्रकाश एव सर्वजीवितभूतो मायीयव्यवहारे प्रमाणं कल्पयति इत्यतः पूर्वसिद्धत्वात् तत्र प्रमाणं किमपि नोपयुज्यते इत्याह किं चेति । परप्रकाशापेक्षयान्यत्सर्वं जडतया स्वात्मानमपि भासयितुमशक्तं कथं परं व्यवस्थापयितुमुद्यच्छेदिति यावत् ।

(१२) कश्च उपयोग इति, प्रमाणं नाम अभिनवाभासरूपं प्रमातरि प्रमितिलक्षणां विश्रान्तिं विदधत् प्रमाणं भवति, प्रमाता च नित्यावभासितत्वादविच्छिन्नाभासः सर्वाः प्रमितीः स्वात्मनि अन्तर्मुखरूपे भजते, तत् तस्मिन् कथमभिनव आभास उपयुज्यताम् तत्प्रमितिश्च कुत्रान्यत्र विश्राम्यतु, तस्मात् देहप्राणनीलसुखादिवेद्य एव प्रमाणोपयोगः न तु प्रमाणजीवितभूते परमेश्वरे । तदुक्तम्

‘ प्रमाणान्यपि वस्तूनां जीवितं यानि तन्वते ।
तेषामपि परो जीवः स एव परमेश्वरः ॥ ’

इति ।

(१३) शब्दराशिमयेति, शब्दराशिः — अकारादि-हकारान्तो वर्णस-

न्तापरामर्शसारत्वात् परमशिव एव षट्त्रिंशत्तत्त्वात्मकः प्रपञ्चः। षट्त्रिंशत्तत्त्वानि च, – १ शिव २ शक्ति ३ सदाशिव ४ ईश्वर ५ शुद्धविद्या ६ माया ७ कला ८ विद्या ९ राग १० काल ११ नियति १२ पुरुष १३ प्रकृति १४ बुद्धि १५ अहंकार १६ मनः १७ श्रोत्र १८ त्वक् १९ चक्षुः २० जिह्वा २१ घ्राण २२ वाक् २३ पाणि २४ पाद २५ पायु २६ उपस्थ २७ शब्द २८ स्पर्श २९ रूप ३० रस ३१ गन्ध ३२ आकाश ३३ वायु ३४ वह्नि ३५ सलिल ३६ भूमयः, इत्येतानि।

अथैषां लक्षणानि। तत्र शिवतत्त्वं नाम इच्छा-ज्ञान-क्रियात्मककेवलपूर्णानन्दस्वभावरूपः परमशिव एव। अस्य जगत् स्रष्टुमिच्छां परिगृहीतवतः परमेश्वरस्य प्रथमस्पन्द ए-

---

मूहो गर्भीकृतसमस्तविश्वस्तन्मयो योऽनन्यमुखप्रेक्षित्वस्वातन्त्र्यविश्रान्तिरूपः 'अहमेव प्रकाशात्मा प्रकाशे' इत्येवं-रूपः पूर्णाहन्तापरामर्शः स एव सारम् अतुच्छं रूपं यस्य तस्य भावस्तस्माद्धेतोरित्यर्थः।

(१४) षट्त्रिंशत्तत्त्वानि, तस्य भावस्तत्त्वम् इति भिन्नानां वर्गाणां वर्गीकरणनिमित्तं यदेकमविभक्तं भाति तत्तत्त्वम्, यथा गिरिवृक्षपुरप्रभृतीनां नदीसरःसागरादीनां च पृथिवीरूपत्वमब्रूपत्वं चेति

(१५) सर्वप्रमातृणामन्तः परिस्फुरत्पूर्णाहन्ताचमत्कारमयं सर्वतत्त्वोत्तीर्णं सकलतत्त्वराशिगतसृष्टिसंहारशतसहस्रप्रतिबिम्बनसहिष्णु महाप्रकाशवपुः शिवतत्त्वम्।

वेच्छाशक्ति[१६]तत्त्वम् अप्रतिहतेच्छत्वात्, सदेवाङ्कुरायमाण-मिदं जगत् स्वात्मनाहन्तयाच्छाद्य स्थितं रूपं सदाशिवत[१७]-त्त्वम्, अङ्कुरितं जगदहन्तयावृत्य स्थितमीश्वर[१८]तत्त्वम्, अहन्ते-दन्तयोरैक्यप्रतिपत्तिः शुद्ध[१९]विद्या, स्वस्वरूपेषु भावेषु भेदप्रथा माया[२०], यदा तु परमेश्वरः पारमेश्वर्या [२१]मायाशक्त्या स्वरूपं

---

(१६) तस्यैव स्वस्वातन्त्र्यमाहात्म्यात् बहिरुल्लिलसिषया परानन्द-चमत्कारोद्रेकात् अहमिति परामर्शः शक्तितत्त्वम् ।

(१७) यदा परमेश्वरः शुद्धचिन्मात्राधिकरण एवाहमित्यंशे इदमंश-मुल्लासयति तदा तस्य प्रोन्मीलितमानचित्रकल्पभावराशिविषयत्वेन अ-स्फुटत्वात् इच्छाप्रधानं सदाशिवतत्त्वम् ।

(१८) स्फुटीभूते च इदमंशे यदाहमंशं निषिञ्चति तदा ज्ञानशक्ति-प्रधानमीश्वरतत्त्वम् । अनयोः प्रोक्तयोस्तत्त्वयोरहंविमर्शस्याविशेषेऽपि इद-मंशस्य ध्यामलत्वाध्यामलत्वाभ्यां विशेषः ।

(१९) यदा पुनः प्ररूढभेदभावराशिगतेदमंशस्फुरणे चिन्मात्रगत-त्वेनाहमंशः समुल्लसति भेदाद्वैतवादिनामिव ईश्वरस्य यः समधृततुला-पुटन्यायेनाहमिदमिति परामर्शः तत् क्रियाशक्तिप्रधानं विद्यातत्त्वम् ।

(२०) मायेति, दुष्करतमवस्तुसंपा इति दनाप्रतीघातरूपा अचिद्रूपे शून्यादौ च प्रमातृताभिमानं प्ररूढं कुर्वती चिदेकमयानपि भावान् भेदेन आभासयन्ती स्वरूपं तिरोदधती कलादिक्षित्यन्तानां भावानामुपादान-कारणं च माया ।

(२१) मायाशक्त्येति, स्वातन्त्र्यापरपर्यायया ।

पं० ६ क० पु० संकुचितग्राह्यग्राहकतामिति पाठः ।

गृहयित्वा संकुचितग्राहकतामश्नुते तदा पुरुषसंज्ञः, अयमेव मायामोहितः कर्मबन्धनः[22] संसारी[23], परमेश्वरादभिन्नोऽपि अस्य मोहः परमेश्वरस्य न भवेत् – इन्द्रजालमिव ऐन्द्रजालिकस्य स्वेच्छया संपादितभ्रान्तेः, विद्याभिज्ञापितैश्वर्यस्तु[24] चिद्घनो मुक्तः[25] परमशिव एव । अस्य सर्वकर्तृत्वं सर्वज्ञत्वं पूर्णत्वं नित्यत्वं व्यापकत्वं च, शक्तयोऽसंकुचिता अपि संकोचग्रहणेन कला-विद्या-राग-काल-नियतिरूपतया[26] भवन्ति । अत्र कला[27]-

---

(२२) कर्मबन्धन इति, कर्माणि स्वात्मनो बन्धकानि अभिमन्यमानः।

(२३) संसारीति, संसरति इत्यतः संसारी, देहोऽपि स्वरूपसादृश्यं बाल्ययौवनादिषु अनुवर्तयन् संसरतीव, बुद्ध्यादेस्तु जन्मान्तरेऽपि संसरणम् ।

(२४) विद्याभिज्ञापितैश्वर्यस्तु इति, विद्यया स्वरूपप्रकाशनशक्त्या अभिज्ञापदं प्रापितमैश्वर्यं यस्य, अत एव चिद्घनः शरीराद्यपि विश्वमचिद्रूपव्यामिश्रणशून्यं संवेदनमेव अभिमन्यमान इत्यर्थः ।

(२५) मुक्त इति, पुनर्जन्मबन्धविरहात् देहे स्थितेऽपि मुक्त इति व्यपदेशयोग्य इति भावः । पतिते तु परमशिवस्वरूप एवेति ।

(२६) नियतिरूपतया भवन्तीति, यथा राज्ञापहृतसर्वस्वस्य अनुकम्पया जीवनार्थं किंचित् स्तोकं धनं दीयते तथैव अणुत्वमापन्नस्य बोधस्य अपहृतसर्वज्ञत्वादेस्तत्स्थाने किंचित्कर्तृतादिपरमार्थं कलादिकं वितीर्यते इति भावः ।

(२७) कलेति, यया सर्वं कर्तुमसमर्थः किंचिदेव घटादिकं करोतीति।

नाम अस्य पुरुषस्य किंचित्कर्तृताहेतुः, विद्या[28] किंचिज्ज्ञत्वकारणम्, रागो[29] विषयेष्वभिष्वङ्गः, कालो हि भावानां भासनाभासनात्मकानां क्रमो[30]ऽवच्छेदको भूतादिः, नियतिः[31] ममेदं कर्तव्यं नेदं कर्तव्यम् इति नियमनहेतुः, एतत् पञ्चकम् अस्य स्वरूपावरकत्वात् कञ्चुकमिति[32] उच्यते, महदादि-पृथिव्यन्तानां तत्त्वानां मूलकारणं प्रकृतिः, एषा च सत्त्वरजस्तमसां[33] सा-

---

(२८) विद्येति, यया किंचिदेव पुरोवर्ति घटादिकं जानाति न पुनर्दूरव्यवहितं वस्तु इति ।

(२९) राग इति, अपूर्णमन्यतया इदं मम उपयुज्यते, भूयासं, मा कदाचित् न भूवम् इत्येवंरूपः ।

(३०) क्रमोऽवच्छेदक इति, आज्ञासिषं जानामि ज्ञास्यामि इति, अकार्षं करोमि करिष्यामि इति ज्ञानक्रियास्वरूपेण भावानपि तथा कलयन् अवच्छिनत्ति इति ।

(३१) नियतिरिति, ममेदं कर्तव्यमिति, इदं स्वर्गादिफलकमश्वमेधादिकमेव मया कर्तव्यं न निरयादिफलकं ब्रह्महननादि इति । अथ च नियतादेव कारणान्नियतमेव कार्यमित्यादि बहुविधं नियतिरूपम् ।

(३२) कञ्चुकमिति, स्वरूपाद्व्यतिरिक्तमपि अव्यतिरिक्ततया पूर्णसंवित्स्वरूपमाच्छाद्य स्थितमित्यर्थः ।

(३३) सत्त्वरजस्तमसां सुखदुःखमोहात्मकानां प्रकाशक्रियानियमनस्वभावानां साम्यावस्था सामान्यं रूपं, यत्रैषामङ्गाङ्गिभावो नोपलभ्यत इत्यर्थः ।

म्यावस्था अविभक्तरूपा, निश्चय[34]कारिणी विकल्पप्रतिबिम्ब[35]धारिणी बुद्धिः, अहंकारो नाम—ममेदं न ममेदमित्यभिमानसाधनम्, मनः संकल्पसाधनम्, एतत्त्रयमन्तःकरणम्[36]। शब्द-स्पर्श-रूप-रस-गन्धात्मकानां विषयाणां क्रमेण ग्रहणसाधनानि श्रोत्र-त्वक्-चक्षुर्जिह्वा-घ्राणानि पञ्च ज्ञानेन्द्रियाणि। वचनादान-विहरण-विसर्गानन्दात्मक्रियासाधनानि परिपाट्या वाक्-पाणि-पाद-पायूपस्थानि पञ्च कर्मेन्द्रियाणि। शब्द-स्पर्श-रूप-रस-गन्धाः सामान्याकाराः पञ्च तन्मात्राणि[37]। आकाशमवकाशप्रदम्, वायुः संजीवनम्, अग्निर्दाहकः पाचकश्च, सलिलमाप्यायकं द्रवरूपं च, भूमिर्धारिका,

---

(३४) निश्चयकारिणीति, इदमेतादृक् इत्येवंरूपो निश्चयः।

(३५) सत्त्वप्रधानत्वेन स्वच्छतया प्रतिबिम्बग्रहयोग्यत्वात् विकल्पप्रतिबिम्बधारिणीति भावः।

(३६) अन्तर्वेद्यस्य सुखादेर्ग्रहणसाधनत्वात् अन्तःकरणम्। अङ्गाङ्गिभावेन गुणानां कार्यं, वक्ष्यमाणस्य भूतेन्द्रियादेः कार्यवर्गस्य च कारणम्।

(३७) तन्मात्राणीति, तदेव नाधिकं तत्र अन्यदस्तीति तन्मात्रशब्देनावान्तरविशेषरहिता शब्दाद्या उच्यन्ते।

'[३८]यथा न्यग्रोधबीजस्थः शक्तिरूपो महाद्रुमः ।
तथा हृदयबीजस्थं विश्वमेतच्चराचरम् ॥'

इत्याम्नायनीत्या पराभट्टारिकारूपे हृदयबीजेऽन्तर्भूतमेतज्जगत् । कथं ?— यथा घटशरावादीनां मृद्विकाराणां पारमार्थिकं रूपं मृदेव, यथा वा जलादिद्रवजातीनां विचार्यमाणं व्यवस्थितं रूपं जलादिसामान्यमेव भवति, तथा पृथिव्यादिमायान्तानां तत्त्वानां सतत्त्वं मीमांस्यमानं सदित्येव भवेत्, अस्यापि पदस्य निरूप्यमाणं धात्वर्थव्यञ्जकं प्रत्ययांशं विसृज्य प्रकृतिमात्ररूपः सकार एवावशिष्यते, तदन्तर्गतमेकत्रिंशत्तत्वम्, ततः परं शुद्धविद्येश्वर-सदाशिवतत्त्वानि ज्ञान-क्रियासाराणि शक्तिविशेषत्वात् औकारेऽभ्युपगमरूपेऽनुत्तरशक्तिमयेऽन्तर्भूतानि । अतः परमूर्ध्वाधः सृष्टिरूपो विसर्जनीयः, एवं-भूतस्य हृदयबीजस्य महामन्त्रात्मको [३९]विश्वमयो विश्वोत्तीर्णः परमशिव एवोदयविश्रान्तिस्थानत्वान्निज-

(३८) यथेति, यथा वटबीजे तत्समुचितेनैव वपुषा अङ्कुरपत्रफलानि तिष्ठन्ति एवं नानाविधतनुकरणादिवैचित्र्यशालि विश्वमिदं हृदयबीजान्तःस्थितं । मयूराण्डरसे सर्वशिख्यवयवानुप्रविष्टवर्होपवर्हादिपूर्णरेखादिवैचित्र्यशिल्पकल्पनाकौशलवत् अवधानधनैः सूक्ष्मेक्षिकयावधार्यम् ।

(३९) विश्वमयो विश्वोत्तीर्ण इति, सर्वाकारत्वं निराकारत्वं चात्र क्रमेण हेतुः ।

स्वभावः । ईदृशं हृदयबीजं तत्त्वतो यो वेद समाविशति च स परमार्थतो दीक्षितः प्राणान् धारयन् लौकिकवद्वर्तमानो जीवन्मुक्त एव भवति, देहपाते परमशिवभट्टारक एव भवति ॥

---

(४०) दीक्षित इति, तिलाज्याहुतिवर्जितमेतत्परिज्ञानमेव तत्त्वतो दीक्षा इति भावः ।

इति श्रीमन्महामाहेश्वराचार्यवर्यक्षेमराजविरचिता
पराप्रावेशिका समाप्ता ॥

सद्विद्यानां संश्रये ग्रन्थविद्वद्-
व्यूहे ह्रासं कालवृत्त्योपयाते ।
तत्तत्सद्धर्मोद्दिधीर्षैकतान-
सत्प्रक्षौजःशालिना कर्मवृत्त्यै ॥ १ ॥

श्रीमत्कश्मीराधिराजेन मुख्यै-
र्धर्मोद्युक्तैर्मन्त्रिभिः स्वैर्विवेच्य ।
प्रत्यष्ठापि ज्ञानविज्ञानगर्भ-
ग्रन्थोद्धृत्यै मुख्यकार्यालयो यः ॥ २ ॥

तत्राजीवं निर्विशद्भिर्मुकुन्द-
रामाध्यक्षत्वाश्रितैः सद्भिरेषः ।
पूर्त्या शुद्ध्या व्याख्यया संस्कृतः स्तात्
पूर्णो ग्रन्थः श्रेयसे सज्जनानाम् ॥ ३ ॥

(तिलकम्)

श्रीस्वात्मशिवार्पणं शिवदं च वोभवीतु अध्येतृश्रोतृविमृष्टृणाम् ॥

BL 1218 S5 1918

Sattrimsat-Tattvasamdoha
Shatatrimsattattvasamdohah

[redacted]

PLEASE DO NOT REMOVE
CARDS OR SLIPS FROM THIS POCKET

UNIVERSITY OF TORONTO LIBRARY

UTL AT DOWNSVIEW
D RANGE BAY SHLF POS ITEM C
39 12 15 03 08 010 2